॥इदंपुस्तकंरुद्रदेवप्रायश्चितं॥

श्रीगणेशायनमः ॥ ॥ श्रीसरस्वत्यैनमः ॥ ॥ श्रीनृसिंहंश्रियाप्युक्तंगणेशंचसरस्वतीं।आपस्तंबमुनीनान्या
स्त्राणम्यपितरंगुरुं १ नारायणसुतोरुद्रदेवइतिश्रुतिः।तेनाग्निहोत्रहोमोयंतन्यतेधीयतेसतां १ नमस्स
यस्युपक्रमः।अथअग्निहोत्रकालेगणेशंपूजयित्वाप्राणानायम्यअग्निहोत्रमारप्स्ये।तेनयावज्जीवंहोष्यामि।पु
नःप्राणानायम्यअग्निहोत्रमारभमाणोदशहोतारंहोष्यामि।आहवनीयंविहृत्य।अजस्त्रेष्वग्निष्विन्वाग्नीन्द्रह्वास
कृहृहीतंगृहीत्वा।चितिस्रुग्गिमादित्या माधर्वयुरितंतं संततं मनसाजपित्वोपांशुजपो वाक्यमशःपाठस्य।वाचस्पतेवि
धेनामन्।विधेमतेनाम।विधेस्त्वमस्माकंनाम वाचस्पतिः सोमंमपिंब आस्मासुनृम्णांधास्स्वाहा।इत्याहवनीयेजु
होति।वाचस्पतेब्रह्मणइदं अग्निपरित्यज्येयंतेसमानं।आपस्तंबाश्वलायनयोःप्रथमप्रयोगे।आपस्तंबयजमा
नोधिवृक्षसूर्येआविःसूर्येवा।अस्तमयेगितुर्थः।अपराह्णेगार्हपत्यंप्रज्वल्येत्याश्वलायनः।प्रागुदयात्प्रातः।अ
शिरसिब्रह्मयच्छेत्युपवेषमादाय।सुगार्हपत्योविदहन्नुधेहि।गार्हपत्यमभिमंत्र्य।उद्धृत्यस्यत्वाग्नेप्रतिसीदत।उ

द्दीपयति।यजमानः ॐ भूर्भुवः।अध्वर्युः वाचात्वाहोत्राप्राणेनोद्गात्रा·रामि।गार्हपत्यादाहवनीयंज्वलंतमुद्धरति।भूर्भुव
स्वःध्रियमाण· तस्मात्।राआर्यदेनेतिप्रातः।उध्रियमाणमनुमंत्रयते।उद्धृत्य तस्मिन्योनितोदक्षिणाग्निंसमानीयआ
हवनीयमानयति।अग्निपतयेजिगायाग्निमग्नोस्वाहा।अग्नेसंम्राडजेकपादाहवनीयःदधामि।इतिसायंप्रत्यङ्मु
खआहवनीयंदधाति।प्राङ्मुखःप्रातः।परान्यथहोमस्तदाग्निनिवृत्तिः।इत्युद्धरणं।ततःसंध्यावंदनं।अथहोमका
लः।अस्तमितेहोमः।नक्षत्रंदृष्ट्वाप्रदोषांतेहोमकालः।सायंप्रदोषांतेनवनाडिका।उदयोत्तरंसंगवांतःप्रातः।
अथहोमद्रव्याणि।पयोदधियवागूश्चसर्पिरोदनतंडुलाः।सोमोमांसंतथातैलंआपस्तानिदर्शवत्।तत्रपूर्वंपूर्वंश्रे
यान्।येनद्रव्येणसायंजुहुयात्तेनैवप्रातः।अभावेप्रतिनिधिः।आज्यपयसोःपरस्परंप्रतिनिधिः।प्रकृतमनुसरा
मः।एवंगुणेत्यादि·सायमग्निहोत्रहोमंपयसाहोष्यामि।विम्बदानीमाभरं·षाम।स्वयंयजमानइध्माहरति।इध्मं
त्रेधाकृत्वा।यदग्नेयानि·विष्ठा।गार्हपत्येसमिधमादधाति।यदस्युपजिह्विकाविष्प।दक्षिणाग्नौ।रात्रिं॰ रात्रि·

रु३०
१

षाम्।आहवनीयेवर्षिष्ठं।परिसमूहनेनाग्नीनलंकुर्वेति।अग्ने गृहपते शुंधस्वेति गार्हपत्यं।अग्नेवङ्क्षे शुंधस्वेति दक्षि
णाग्नेः।अग्ने संम्राट् शुंधस्वेत्याहवनीयं।उदगग्रैः प्रागग्रैस्त्रदर्भैरग्नीन् परिस्तृणाति।अग्निमग्नीवा।द्वितीयपक्षे।आ
हवनीयेवा।तृतीयपक्षे गार्हपत्याहवनीययोः।आर्यीकृतान्न स्थाली ऊर्ध्वकपाला चक्रवर्तिर्भवति।दक्षिणेन वि
हारं शाखामुखी अग्निहोत्री तिष्ठति।तां यजमानोनुमंत्रयते।इडासि व्रतभृदहन्त्वावुभयोर्व्रतं चरिष्यामि स्वरोहि एय
हन्नाउभयोर्व्रतं चरिष्यामी उपहिमपि प्रयस्ते उपह्वयदितएहि गौरेहि सूदरोहि सत्येन त्वाह्वयामि।अथ पुंवैरिम
भिमृशति।इयमसि तस्यास्तेग्ने वत्सः सामे स्वर्गं च लोकममृतं च धुक्ष्व।इति दोग्ध्वा दक्षिणामुदोहयति प्रषा
सि।वत्समुपसृज।अत्रस्थालींदोहनेनचदोग्धि।उपसृष्टामुह्यमानां धारां घोषं च यजमानोनुमंत्रयते।अपस्मा
वः।संदेयं।घोषेवं म॰दधातु।उत्संदुहंति॰दधातु।स्वआयतने पत्न्युपवेशयति।पिष्टपरेणाहवनीयं दक्षिणाति
क्रम्योपविश्यविधुदसि॰पेमि।मयि श्रद्धा इत्याचामति।विहाराद्बहिर्गत्वा शुध्यर्थे द्विराचामेत्।संचारस्त्वा

रा.म.
१

ग्नेणाहवनीय।कृतं त्वा सत्येन परिषिंचामीति सायं।सत्यं त्वर्तेन॰प्रातः।गार्हपत्यदक्षिणाग्न्याहवनीयानां परिषेच
नं।यज्ञस्य संततिरसि।गार्हपत्यात्स्वकम्य संततामुदकधारां॰स्रावयन्त्वाहवनीयात्।मंत्रेणैव धारासंयोगः।धृ
ष्टिरसि ब्रह्म यच्छ।उपवेषमादाय।भूतकृतस्यापोढं जन्यं भयमपोढाः सेना अभीत्वरीः।इति गार्हपत्यादुदीचां गा
रानिरुह्य त्वंतान्।गार्हपत्याद्बहिरित्यर्थः।सगराः स्थ इत्यभिमंत्र्य जपति।अग्नय आदित्यं गृह्णाम्यह्नेरात्रिं सा
यं।आदित्याया ग्निं गृह्णामि।रात्रियाअन्तः इति प्रातः।इडायाः पदं घृतवच्चराचरं जातवेदो हविरिदं जुषस्व।ये ग्रा
म्याः पशवो विश्वरूपाः स्तेषां॰ सप्तानामिह रंतिरस्तु।रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय।इति तेष्वग्निहोत्रमधि
श्रयति।रेतो वा अग्निहोत्रेन सुशृतं कुर्यात्।अदब्धेन त्वा चक्षुषावेक्षेतृणेन ज्वलतावेक्षते।दोहनं संक्षालनं स्त्रु
वेणादाय।हरस्ते मा विनैषं इति प्रति षिंचति।अपां वा स्तोकेन शुद्धोदकेन वेत्यर्थः।उद्वस्थो देह॰रोचय।पुनेर
वावेक्ष्य।अंतरितं॰रक्षोंतरिता॰प्रत्यगेनमृच्छ।इति त्रिः पर्यग्निकृत्वा।किंचित्कालं प्रतीक्ष्य।घर्मोसि रायस्पोष

रुइ० ३

वनिरहोर्जं दृंहावर्त्मकुर्वन्नायुर्द्रासयति।उदकुशांतः।इहप्रजां पशूंदृंहाइतिद्विर्भूमौ प्रतिष्ठापयति।स्वभूतकृतस्य
प्रस्पृहंजनमभयंप्रस्पृष्ठाः सेनाअभीत्वरीः।गार्हपत्यं गाराभ्यस्पृश्य।देवसत्वा.दृढे।मंत्राहृत्मास्त्रुक्स्त्रुवमादायनमंत्रा
हितिरिति।प्रत्युष्टंरक्षःप्रत्युष्टाअरातयः।गार्हपत्येप्रतितप्य।अरिष्टोयजमानःपत्नी च।युगपद्धस्तेन संमृश्यहि
रण्यपष्टिरस्पृष्टपलाशास्त्रोतोयज्ञानां।अग्निहोत्रहवणीमभिमंत्र्य।ॐ सुत्रेष्यामि हव्यं देवेभ्यः पाप्मनोयजमा
नमितिसायं।ॐ सुत्रयामीतिप्रातः।हविर्देवानाम्मअस्तु।इत्युपांस्पृक्ता।ॐ सुत्रयेस्वैरनुजानीयात्।चतुरुन्न
यति।अग्नयेचत्वापृथिव्यैचोन्नयामि।वायवेचत्वांतरिक्षायचोन्नयामि।सूर्यायचत्वादिवेचोन्नयामि।चंद्रमसेच
त्वानक्षत्रेभ्यश्चोन्नयामि।अद्भ्यस्त्वौषधीभ्यश्चोन्नयामिइतिजामदग्नीनांपंच।सर्वत्र पूर्णेति।यजमानातिष्ठन्ने
वोन्नयति।सज्जूर्देवैः सायंयावभिः।प्रजांदृंह।शतपीवभिरितिप्रातः।पुनःप्रतितप्य।दशहोत्रावाभिमृश्य।पा
लाशीं समिधं प्रादेशमात्रीमुपरिधारयन्।अधस्तात्कूर्चंधारयन्।गार्हपत्यस्योपरिष्टाधारयन्।उर्वेतरिस्त

रामं ३

मन्विहिइतिगच्छन्दशहोतारंव्याचष्टे।संमंप्रागोर्धारयमाणाः।चित्तिस्त्रुक्.सामाध्वर्युः।अत्रप्रतिवाक्यंप्राणमे
दः।स्वाहाग्नयेवैश्वानरायेतिमध्यदेशेनियच्छति।अग्नयेवैश्वानरायेदं वातायत्वाउद्गृह्य।वातायेदं.पुनःप्रा
णैःसमंकरोति।उपप्रेतसंयरध्वं.भूर्भुवस्स्वराष्ट्रुर्मेयच्छ।इत्यपरेणाहवनीयंउपसादयति।प्रथमाग्निहोत्रेर्वी
हतिभिर्हविरासादयति।नप्रातः।ततःआहवनीयज्वालाशान्तेश्शरांगारेषुहोमः।विद्युदसुपेमि।होष्यन्न
यउपस्पृशतिपलाशीं समिधमादधाति।एषातेअग्ने.स्वाहा।अग्नयइदं.स्रुचमादाय।प्रान्यापान्यनिमी
ल्यावीक्ष्याभिक्रम्यप्रदीप्तायांद्व्यंगुलिभिःसमिक्षिप्तुहोति।भूर्भुवस्वः अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहा।सा
यमग्निहोत्रंजुहोति।अग्नयेज्योतिषइदं.द्वयद्व्यंस्त्रुक्स्रुवेणपार्श्वेनकठिनंहविः।सूर्योज्योतिर्ज्योतिः
सूर्यःस्वाहा।सूर्यायज्योतिषइदं.कृत्वामहदभिवीक्ष्यते।इषेत्वाइतिस्त्रुक्स्रुवादवाचीनं सायंलेप
मवमार्ष्टि।ऊर्जेत्वाइतिऊर्ध्वंप्रातः।अवाचीननखुअहस्तेनउर्ध्वंउत्तानेनेत्यर्थः।पार्श्वेनहोमेपार्श्वेन

रुइं० ४

लेपक्रिया। ओषधीभ्यस्त्वौषधीर्जिन्वेति बर्हिषि लेपं निमृज्य। ओषधीभ्य इदं॰ वर्चो मे यच्छ स्रुचं सादयित्वा
अग्ने गृहपते माभिः पतीक्षे। गार्हपत्यं पतीक्षते। पुनः स्रुचमादाय भूर्भुवस्सुवस्स्वाहा। इत्यनेनाङ्गुलिं ग्रवीर्धे
समिधे जुहोति। वर्षीयसीमुत्तराङ्गुलिं हुत्वा भूयो भक्षायावशिनष्टि। हुत्वा स्रुचस्थं हृत्वा। रुद्र मृडानार्भवः
त्वेनं। इति स्रुचा विरग्नेर्ज्वालायामन्तरतः कंपयति। रुद्राय पशुपतय इदं॰ अय। पूर्ववल्लेपमवमृज्य। प्राचीनावी
ती स्वधा पितृभ्यः पितॄन् जिन्वेति दक्षिणेन वेदिं भूम्यां लेपं निमृज्य। यजमानः पितृभ्य इदं॰ यज्ञोपवीत्यप उप
स्पृश्य। प्रजां मे यच्छेति स्रुचं सादयित्वा। हविरसि॰ सुपाणी। इत्यप उपस्पृश्य। न यजमानस्य विद्युहृष्टिः अ
ग्ने गृहपते परिषद्यज्जुषस्व स्वाहा। इति स्रुवेण गार्हपत्ये जुहोति। अग्नये गृहपतये परिषद्यायेदं। अग्नये गृह॰
यस्वाहा। मंत्रवत्त्यागः। अग्ने शम्य परिषद्यजुषस्व स्वाहा। दक्षिणाग्नौ जुहोति। तथैव त्यागः। अन्नपतेन्नस॰
ष्पदे स्वाहा। अग्नयेन्नपतय इदं॰ तत्रैव यजमान उपनिष्टते। दिवसशीतं तु वाकेन। भूर्भुवस्सुवः सुप्रजाः प्रज

राम० ४

याभूयासं सुवीरो पोषैः इति वा। अथांतर्वेदि तिस्थितायां स्रुचि लेपमादाय दंतेन स्पर्शयन् विहाराद्बहिः। प्र
पासीति प्राशणपः पीत्वा त्यक्तो यजमानः द्विराचम्य स्वयं पुनः प्राशीति प्राशणाचम्य। स्रुचा शेषं हस्ते वधाय उद
ङ्मुखो स्पृश्य। गर्भेभ्यस्त्वा गर्भो पीणीं ह्वाग्नेयं हविः प्रज॰ दीधर स्वाहा। प्राश्य गर्भेभ्य इदं। सायंहोमत्यागं
कृत्वा प्राश्य। सोयं हविरिति प्राप्ते मंत्रं समन्नमिति। द्विर्हस्तं निर्लिह्य हस्तं प्रस्रयित्वा। उच्छिष्ट[illegible]भाजो जिन्वेति
पराचीनं निनयति। उच्छिष्टभाग्भ्य इदं। आचम्याथ गाहवनीयं दर्भैरग्निहोत्रहवणीं प्रक्षाल्य। अद्भिः स्रुचं सकृ
त्पूरयित्वा। सर्पेभ्यस्त्वा सर्पाञ्जिन्वेति इति दिशं विसिंच्य। नात्र स्थाननियमः। यथालिंगं त्यागः। चतुर्थं पूरयि
त्वा पृथिव्या अमृतं जुहोमि स्वाहा। अपरेणाहवनीयमर्धं निनीय। शेषं पत्न्यां जलेन। गृहेभ्यस्त्वा गृहाञ्जिन्व। यदि
पत्नी नानुष्ठाइजस्वलादिना उपविष्टान स्यात्। देवानां पत्नीभ्यो अमृतं जुहोमि स्वाहा। इति पत्न्याय तनेने निन
येत्। अपरं स्रुचानीय विप्रुषां शां। तरसि। इत्यत्रयनदेशे। पृथिव्या इदं॰ गृहेभ्य इदं॰ देवानां पत्नीभ्य इदं॰ वि

रुद्र० ५

जुहुध्य इदं। आहवनीये स्रुचं प्रताप्य हस्तेनावधाय उद्गाहत्य सप्तऋषिभ्यस्त्वा सप्तर्षीन् जिन्व। सप्तर्षिभ्य इदं। स्रुचमं
तर्वेदि निधाय। दीदिहि दीदिदासि। दीदाय। इति मंत्रेण गार्हपत्यदक्षिणाग्न्याहवनीयेषु एकैकां समिधमाधा
य। मंत्रः समुदायात्मक एकैकं मंत्रेण क्षिपेदिति केचित्। ततो यथाग्निमंत्राहुतिः। परिस्तरणानि विचिनोति। पूर्व
वत्परिसमूहनं पर्युक्षणं। अग्निहोत्रस्थाल्यामपयानीय अक्षितमक्षितेत्वा जुहोमि इति अक्षितायेदं। स्थालीं
प्रक्षाल्य तेनोदकं अंतर्वेद्यां निनीय। अनाज्ञातत्रयं यजमानः हविरसि गां। अञ्जद्य इमं पश्चाचामति। सु
धर्य विहाराद्बहिः द्विरात्रम्य। अंतर्वेद्यूर्ध्वस्तिष्ठन्। अन्नादास्थान्नादोभूयासं यशस्यः वर्चसे। एषाग्निहोत्रस्था
नयति। एषोग्निहोत्रावभृथः। अग्नेनयेसुपस्थानं। यस्य स्मृ। एवमहरहः सायंप्रातर्यजमानः स्वयमग्निहो
त्रं जुहुयात्। पर्वणि वा स्वयं। अन्यत्र ऋत्विग्भ्य एव। आशौचादौ ऋत्विजाभावे यजमानः। श्रौते कर्मणि नान्का
लं स्नातः शुद्धिमवाप्नुयात्। इति। पक्षहोमाः शौचमध्येपि भवंत्येव। आपत्तिं विना पक्षहोमकरणे दोष उक्तः

राम० ५

संग्रहे। अनानुरोध उपवासी च निश्चितो निरुपद्रवः। पक्षहोमस्तु यः कुर्यात्स चरेत्पतितव्रतमिति। अथ संक्षेपमा
श्रित्य प्रवासोपस्थानं। ग्रामांतरे एकरात्रवासः। प्रवासं करिष्य इति संकल्प्य। गार्हपत्यं प्रज्वल्य। अभयंकर अभयं
कुरु स्वस्ति मे स्त्वभयं मेऽस्तु। इति गार्हपत्यमेवोपस्थाय। वाग्यतोभिप्रव्रजति। मांतर्गामपदीवयं मा यज्ञादि
द्धासोमिनः। मांतस्थानो अरातयः। उदस्यां उन्नरान यायोध्यतेनाभूत। रायस्पोषेण संसृज प्रजया च बहून्कृधि
। इत्याराद् अग्निभ्यो वाचं विसृजते। आराद्दूरादित्यर्थः। प्रवाससमाप्तौ समिधः कृत्वा प्रत्येत्य आराद् अग्निभ्यो वाचं यच्छ
ति। विश्वदानीत्वा भरंतो नाद्वेरेण मनसा। अग्ने मा ते प्रतिवेशा रिषाम। नमस्ते अस्तु मीढुषे नमस्त उपसद्वने
। अग्ने शुंभस्व तन्व संहरष्या संसृज। अग्निमभ्येति। गार्हपत्यं समिध्य। अभयंकर। अस्तु। इत्युपस्थाय। नव
रात्राद् ऊर्ध्वं प्रवासनिमित्तं प्रायश्चित्तं करिष्ये। इति संकल्प्य। आहवनीयं विहृत्य। मित्रो जनान्यातयति प्रजा
नन्मित्रो दाधार पृथिवीमुत द्यां। मित्रः कृष्टीरनिमिषाभिचष्टे सत्याय हव्यं घृतवद्विधेम। इत्याहवनीयमुपस्था

याज्जुह्वांसकृद्गृहीत्वा। मनोज्योतिः दध्यात्। याइश्चउषसो घृतेनस्वाहा। इत्याहवनीयेजुहोति। मनसेज्योतिषइ
दं। इति हुत्वा सर्वप्रायश्चित्तं कुर्यात्। अथाग्निभिः सहप्रवासः। नैकरात्रेवसति। निमित्तेपि वास्तोष्पति होमो भव
ति। किंपुनर्बहुरात्रनिमित्तेषु। सगृहः प्रवसन्वास्तोष्पति होमं करिष्यामि। इति संकल्प्य। जुह्वां सकृद्गृही
त्वा। वास्तोष्पते प्रति॰ ष्यहे। इति पुरोनुवाक्यामनूच्य। वास्तोष्पते शग्मया स॰ पाहि क्षेम॰ दानस्वाहा। इति गा
र्हपत्ये हुत्वा ततः आत्मन्येव समारोपः। नारण्योः। यस्मिन्कर्मणि अध्वर्युर्यजमानो वा। तत्राध्वर्युसमारोप
पक्षे अरण्योरेव समारोपः। यजमानस्तु स्वात्मन्येवेति। एतद्विपरीतं चेदग्निर्लौकिको भवति। आत्मसमारूप
णे मूलभूता श्रुतिः। यातेअग्नेयज्ञियातनूस्तयेह्यारोहेत्यात्मन्समारोहयते यजमानो वा अग्नेर्योनिः स्वाया
मेवैनं योन्यां॰ समारोहयते। अथ समारोपप्रकारः। गार्हपत्ये हस्तं प्रताप्य। यातेअग्नेयज्ञियातनूस्तयेह्यारो
हात्मात्मानं। अच्छावसूनि जायमानः सक्षयराहि। इति मंत्रांते हस्तगतं ऊष्माणं मुखमध्ये प्रविशति। यथा

कथा कर्तव्यो यत्नः। केचिद्धस्तप्रतपने मंत्रभागः। मुखमध्ये ऊष्मप्रवेशनं तत्तूष्णीं। अजस्य स्वेदेवं दक्षिणाग्न्या
हवनीययोरप्यन्येव। आत्मसमारूढेपि न नियमः आपस्तंबेनोक्तं। कल्पांतरवत् स्नानायमनादिनिषेधो नास्ति
। आत्मसमारूढेपि नियमाभावः। अतोस्पृश्यस्पर्शनं मूत्रपुरीषोत्सर्गो दोषश्च न दोषः। स्नानाचमनोपवासादि
स्मार्तैर्निमित्तैर्यजमानशुद्धौ विशुद्धांते वाग्नयः। केचिदुपरोह्यनिर्हितैर्मो उपस्थानप्रायश्चित्तं कुर्वंति। वा
सो यत्र वसति तत्रापराह्णे उपावरोहेति मंत्रोक्तेः गार्हपत्यादिदेवताभ्रंतेग्नेर्लौकिकमुपसंक्रामति। अपरा
ह्णे ग्रहणं प्रदर्शनार्थं अग्निहोत्रकालान्तरेधार्थ उपदेशो यथा वायुः सुखतो लौकिकमग्निं प्राप्नोति। तथा करो
ति। क्रमेणोपावरोह्यति। इत्येतत्समांडारः। अरणी समारोपेतु मथ्यमानो यदि नोत्पद्यते तदा लौकिकाग्निमा
दाय गार्हपत्यायतने निधाय पूर्णाहुत्यादानादि होमशेषं समापयेत् पुनर्मंथयेत्। प्रकृतमनुसरामः। निवासदेशं प्रा
क्प्रवणे देशे तूष्णीं समुद्धृत्यावोक्ष्य आयतनानि कल्पयित्वा लौकिकाग्निमानीय तत्रोपावरोहेत्। उपावरो

हुजातवेदः। दुरोणे। उभाभ्यां पाणिभ्यां परिगृह्य उपघातं प्रायश्चित्तं कुर्यात्। ततः आयतने निधाय। एवमजस्रप
क्षे उपावरोहणं क्रमेण। अथावसितहोमः। इदं॰ श्रेयो वसानं यदागा॰ स्योनो मे द्यावापृथिवी॰ अभूतां अन
मीवाः प्रदिशः संतु मह्यं। गोमद्धनवदश्ववत्पुरुषवद्धिरण्य[illegible]सुवीरवत्स्वाहा। इत्याहवनीये सकृद्गृहीतं जु
होति। द्यावापृथिवीभ्यामिदं। चिरकालप्रवासनिमित्ते सत्ययं होमः। नाल्पकालप्रवासनिमित्ते वा स्तोष्यति
होमसकृद्दशरात्रादूर्ध्वं तस्माद्देशान्नमने भवति वा। अथ प्रवासधर्माः। प्रवसन् होमकाले विहाराभिमुखो याज
मानमंत्रां जपति। अस्मुपस्थानमपि जपेत्। अध्वर्युरुद्देशतो गोकुर्यादिति त्रिकांडमंडनः। उपस्थानमन्यद
ग्निसंस्काररूपं च याजमानं च अध्वर्यवीनं भवति। यजमानसंस्कारत्वात्। अयेवागमिष्यामीति बुध्यारज
पुरुषनिर्बंधादिना यदा तु न्यायं च त्स्ववसेत्। तदा तत्र स्थ एवाग्नीनुपतिष्ठते। इहैव संतत्र सतो वो अग्नयः
प्राणेन वाचा मनसा बिभर्मि तिरो मा संतस्मायुर्मा प्रहासीत्। ज्योतिषा वो वैश्वानरेणोपतिष्ठते। अन्य मंत्राणां

निवृत्तिः। प्रवसन्नग्निहोत्रकाले विहाराभिमुखो भूत्वा होममंत्रजपांते इहैव संतत्रि संतं प्रतिमंत्रं जपेत्। आपस्तंबा
ग्निहोत्रस्य होमं कथितो मया। रुद्रदेवेन विदुषा तेन तुष्यति यज्ञभुक्। इति श्रीप्रतापनारसिंहे आपस्तंबाग्निहोत्र
होमप्रयोगप्रवासविधिश्च ॥ ॥ अथ आश्वलायनानां अग्निहोत्रप्रयोगः ॥ ॥ उत्सर्गेपराह्णे गार्हपत्यं प्रज्वा
ल्य दक्षिणाग्निमानीय। उद्धराहवनीयं। देवं त्वा देवेभ्यः श्रिया उद्धरामि। पात्रांतरे अग्निं गृहीत्वा। उद्ध्रियमाण उद्ध
र पाप्मनो मा यदविद्वान्यच्च विद्वांश्चकार अज्ञायदेनः कृतमस्ति किंचित्सर्वस्मान्मोद्धृतः पाहि तस्मात्। इतिसा
यं। रात्र्या यदेनः कृतमस्ति किंचिदिति प्रातः। इमंतु मंत्रं। अमृताहुतिममृतायां जुहोम्यग्निं पृथिव्याममृतस्य जो
नौ। तयानंतं काममहं जयामि प्रजापतिः प्रथमो यज्ञिगाया यावद्भिः स्वाहा। इति सायं प्रत्यङ्मुखं आहवनीयायत
ने निधाय। प्राङ्मुखः प्रातः। इत्युद्धरणं। ततः संध्यावंदनं। अस्तमिते होमः। प्रागुदयादाहवनीये तादितो येन प्र
विश्य गार्हपत्यमस्य पश्चात्प्राङ्मुख उपविश्य पत्न्यासह प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं

रुद्र०
८

सायमग्निहोत्रहोमं पयसा होष्यामीति संकल्प्य। दक्षिणाग्निं सजलेन पाणिना त्रिः परिसमूह्य तूष्णीं ततः तथैव प
र्युक्षेन्मंत्रेण। ऋतसत्याभ्यां त्वा पर्युक्षामीति सायं। सत्यऋताभ्यां त्वा पर्युक्षामीति प्रातः। एवं गार्हपत्याहवनीययोः
। ततो गार्हपत्यादविच्छिन्नां सुदकधारां हरेत्। तंतुं तन्वन्नजजनं। पश्चाद्गार्हपत्यस्योपविश्य उदगंगारानपोहेत्। सु
हुतकृतस्य सुहुतं करिष्यथ। तेष्वग्निहोत्रमधिश्रयेत्। अधिश्रितमध्यधिश्रितमधिश्रितं हि ॐ इति इड्काव्याः प
दं घृतवच्चराचरं जातवेदो हविरिदं जुषस्व। ये ग्राम्याः पशवो विश्वरूपास्तेषां सप्तानामभिपुष्टिरस्तु। इति वा। अ
धिश्रितमवज्वलयेत्। अग्निष्टे तेजो मा हार्षीः। स्रुवेण प्रतिषिच्य त्रिवा। शांतिरस्यमृतमसि इति पूर्ववोल्मुके
न त्रिः पर्यग्निं कुर्यात्। अंतरितं रक्षोऽन्तरिता अरातय इति। उल्मुकं निरस्याप उपस्पृश्य। समुद्रं तं कर्षन्निवोदगुद्वा
सयेत्। दिवे त्वा। अंतरिक्षाय त्वा। पृथिव्यै त्वा। इति निदध्यात्। सुहुतं कृतस्य सुहुतमकार्षं। अंतरेणानायतने एम०
मक्षिप स्रुक्स्रुवं प्रतितपेत्। प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातयः स्रुवहस्तः ॐ ८

स्रुन्नयानीतस्रुक्काध्वर्युराहिताग्निराचम्य। अपरेण वेदिमतिव्रज्य दक्षिणत उपविश्य ॐ उन्नयेत्यतिसृजेत्। स्वयं होमे
प्रत्येत्य गार्हपत्यस्योत्तरत उपविश्य। भूरिन्द्र। भुवदिला। स्वारिला। इडेडिला। इति च तद्दुन्नीय तूष्णीं पंचमं जमदग्नीनां। तत
स्तूष्णीं स्थालीमभिमृश्य समिधं स्रुवं चाध्यधि गार्हपत्यं हृत्वा प्राणान्संमित आहवनीयसमीपे कुशेषूपसाद्य जान्वाच्य
समिधमादध्यात्। रजतां त्वाग्निज्योतिषं रात्रिमिष्टकामुपदधे स्वाहा। अग्नय इदं। रजतां त्वा० दधे तेन ऋषिणा तेन ब्रह्म
णा तया देवतयांगिरस्वद्ध्रुवा सीद विद्युदसि विद्य मे पाप्मानमयोम्रहा। अप उपस्पृश्य। प्रदीप्तायां उत्तमात्रे भिन्दुद्ध
यात्। भूर्भुवस्स्वरों अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा। अग्नय इदं। नोऽस्मद्रहद्रोह सः सोमं मणं तिष्ठ अन्यः। जन्मं देवानां
विशस्त्रिष्वा रोचने दिवः। गार्हपत्यमवेक्षेत। प्रभूर्भृमयक्छ। तूष्णीं भूयसीं असंसृष्टां प्रजापतये स्वाहा। प्रजापतय अ३
इदं। उपोत्थाय। भूर्भुवस्स्वः सुप्रजाः प्रजया भूयासं सुवीरो वीरैः सुपोषः पोषैः। अग्निमीळे इति नवर्चं जपेत्। अग्नि
मीळे स्वस्तये। अथोपविश्य स्रुचं त्रिः त्नकंप्य। अवमृज्य कुशमूले प्रनिमार्ष्टि। प्रस्तुम स्त्वा। प्रसु। तेषां दक्षिणत

रु॰इं॰
९

उत्तानांगुलीः करोति। प्राचीनावीती स्वधा पितृभ्यः। पितृभ्य इदं॰ यज्ञोपवीती निधाय स्रुचं। वृष्टिरसि वृश्च मे पाप्मानम
ऋतस्यद्वा अप॰ गार्हपत्ये जान्वाच्य तूष्णीं समिधमाधाय स्रुवेणाहुतिद्वयं जुहुयात्। अग्नये गृहपतये स्वाहा। अग्नये
गृहपतय इदं॰ प्रजापतये प्रजाप॰ पूर्ववद्दक्षिणाग्नौ समिधमाधाय पूर्ववज्जुहोति। प्रथमाहुतौ विशेषः। अग्नये संवेश
पतये स्वाहा। अग्नये संवेश। अग्नये न्नादायान्नपतये स्वाहा। इति वा। ततः सर्वानग्नीनुपतिष्ठते। अभयं वो भयं मे अस्तु
। उदङ्मुखो विहाराद्बहिः स्रुक्स्थहविःशेषं द्विः प्राश्य आयुषे त्वा प्राश्नामि। आचम्य। अन्नाद्याय त्वा प्राश्नामि ततः आ
चम्य। अद्भिः पूरयित्वा सर्पदेवजनेभ्यः स्वाहा। सर्पदेवजनेभ्य इदं इति त्रिः। ततः अग्निहोत्रहवणीं प्रक्षाल्य। ततः पूर्णं
। प्रागुदीच्यां निनयेत्। ऋतुभ्यः स्वाहा। ऋतुभ्य इदं॰ दिग्भ्यः स्वाहा। दिग्भ्य स॰ सप्तऋषिभ्यः स्वाहा। सप्तऋषिभ्य इदं॰ इतर
जनेभ्यः स्वाहा। इतरजनेभ्य इदं॰ पंचमी कुशदेशे पृथिव्याममृतं जुहोम्यग्नये वैश्वानराय स्वाहा। अग्नये वैश्वानरायेदं॰
षष्ठी पश्चाद्गार्हपत्यस्य प्राणममृते जुहोम्यमृतं प्राणे जुहोमि स्वाहा। अमृताय प्राणायेदं॰ अथैनां प्रतापयानं वेदिनि

राम॰
९

दध्यात्। ततस्तिस्रः तिस्रः समिधः एकैकस्मिन्नादधाति। आहवनीयस्य दक्षिणतः उदङ्मुखं तिष्ठन् प्रथमां समंत्रां दीदि
हि स्वाहा। अग्नय इदं। अमंत्रकं द्वे। तेनैव मार्गेण दक्षिणाग्नेर्दक्षिणेन च गत्वा गार्हपत्यस्य दक्षिणतः उदङ्मुखस्तिष्ठन्
दीदाय स्वाहा। इति प्रथमं। अमंत्रकं द्वे पूर्ववत्। दक्षिणाग्नेर्दक्षिणतः तिष्ठन् दीदिदाय स्वाहा। अग्न॰ उदङ्॰ त्यपूर्ववन्म
रिसमूहनपर्युक्षणे कुर्यात्। अनाज्ञातमिति जपित्वा समस्तव्याहृतिभिश्च। अग्नेनये त्युपस्थानं। प्रातर्होमे विशेषः। प्रा
तस्त्वात्वा सूर्योदयात्प्रागुद्धरणं। संध्यां च निधाय। सूर्योदये नरं देशकालकथनं नेप्रातरग्निहोत्रहोमं पयसा होष्यामि।
इति संकल्प्य। अस्तु ने ष्यामीत्यतिसर्जयीत। समिदाधाने हरणी त्वा सूर्यज्योतिष महरिष्टकामुपदधे स्वाहा। सूर्यायेदं॰
हरिणी॰ सीद॰ भूर्भुवःस्वरों सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा। सूर्याय इदमिति प्रधान होमे। शेषं समानं। सर्वे पयो भावे य
वाग्वा होमः। तत्र पयोवत्संस्कारः। यवाग्वा होष्यामीति संकल्पे विशेषः। तस्याप्यभावे आज्येन। तत्रापि पयोवत्संस्का
रः। स्रुवेण प्रतिषेकस्थाने दर्भाग्रं हृदयमाज्ये निक्षिपेदिति विशेष आज्येन होष्यामीति संकल्पः। शेषं पयोहोमवत्

।तदसंभवेतंडुलैः।तत्रांगारापोहनमधिश्रयणंचनास्ति।प्रतिषेकस्थानेप्रोक्षणं।शेषंप्रागवत्।तंडुलैर्होष्यामीतिसंकल्पे
विशेषः।केनचित्प्रतिबंधेनप्रातर्होमासंभवेसमस्तहोमंकुर्यात्।तत्रप्रयोगः।सायंकालेएवोद्धरणं।संध्योत्तरंचसंकल्पे
विशेषः।देशकालकथनांतेअद्यगामिप्रातरग्निहोत्रमाकृष्यअनेनसायमग्निहोत्रेणसहसमस्तहोमंपयसाहोष्यामि।
इत्यादिहविःसंस्कारांतेउन्नयनेमंत्राहृत्याअष्टस्रुवमुन्नीयसमिधद्वयेनसहाहवनीयसमीपेकुशेषूपसाद्येत्यंतेरज
ताग्नेस्येकांसमिधमाधायसायमाहुतिद्वयंस्रुगातदर्वार्धेनहुत्वा।अग्निमीलेतिजपांते।उपविश्यहरणीत्वासूर्यज्यो
तिमित्यपरांसमिधमाधायप्रातराहुतिद्वयमवशिष्टार्द्धद्रव्येणहुत्वाअग्निमीळेतिजपांतेउपविश्यत्रिरनुकंप्येता
दिसमानं।आपस्तंबानांतुसमिदेकेनसहापरेणाग्निंकूर्चेसादयित्वाअनेनरप्पानेअग्नेतिसमिधमाधापोभयोः।सा
यंप्रातर्होमार्थेततःसायमाहुतिद्वयमर्द्धद्रव्येणहुत्वा।स्वधापितृभ्यःपितृंजिन्वेत्येतेनयज्ञोपवीत्यपउपस्पृश्येतेयं
नेकूर्चेसादयित्वाततःप्रातराहुतिद्वयमेर्धद्रव्येणहुत्वास्वधापितृभ्यःपितृंजिन्वेत्यादिप्रकृतिवदितिशेषः।इतिस

मस्तप्रकारः।चिरकालप्रतिबंधेपक्षहोमंकुर्यात्।तत्रप्रयोगः।प्रतिपदिसायंकालेउद्धरणसंध्यावंदनांतेदेशका
लौसंकीर्त्यअद्यप्रतिपत्सायमारभ्यचतुर्दशीसायंकालपर्यंतपक्षहोमान्समानेनपयसाहोष्यामिइतिसंकल्प्य।प
रिसमूहनादिहविःसंस्कारंकृत्वातिथिगणनेनचतुर्दशत्रयोदशवारंचतुःस्रुवमुन्नीयसमिदेकयासहितापरेण
हवनीयंकुशेषूपसाद्य।रजतात्त्वेतिसमिधमाधाय।आपस्तंबानांत्वेषातेअग्नइति।उन्नीतद्रव्येणसायमाहुतिद्वयं
हुत्वाउपस्थानादिसर्वंप्रकृतिवत्।एवंप्रातः।तत्रसंकल्पेद्वितीयाप्रातरारभ्यपर्वप्रातःकालपर्यंतपक्षहोमान्समा
सेनपयसाहोष्यामीतिसंकल्पेविशेषः।सर्वंपूर्ववत्।इतिपक्षहोमः।प्रतिपदतिक्रमणानंतरंप्रतिबंधेउपस्थिते
शेषहोमंकुर्यात्।तत्रप्रयोगः।द्वितीयादितिथिषुउद्धरणसंध्यावंदनेकृतेदेशकालकथनांतेअमुकतिथिसाय
मारभ्यचतुर्दशीसायंकालपर्यंतंशेषहोमान्समानेनपयसाहोष्यामीतिसंकल्प्यशेषंपक्षहोमवदितिशेषहोमः
।भयादिनाप्रातःकालेपक्षशेषहोमकरणासंभवेसायंकालएववासमस्तहोमन्यायेनकुर्यात्।तत्राग्निहोत्रहोमद्र

रुद्र०
११

अस्थापनार्थं यावज्ज्ञातं सहायं कुर्यात्। तत्रप्रयोगः। प्रतिपदि सायंकाले वृत्ताग्न्युद्धरणे सायंसंध्यावंदने च देशकालकथनां
ते प्रतिपत्प्रायमारभ्य पर्वशान्तःकालपर्यंतं यावंतः सायंप्रातर्होमास्तेषामस्य विधिना करिष्य इति संकल्प्य। उत्तरयने षड्विंश
तिवारं वाचन्द्रस्तु तरुन्नीय समिद्द्वयेन सहाहवनीयसमीपे कुशेषु प्रसाद्य आपस्तंबस्त्वेकैव समित्। उभयोः कालयोः
एकदेवत्यमंत्रत्वात्। ततः हविर्द्रव्यं द्वेधा विभज्य समिदाधानपूर्वकं सायमाहुतिद्वयं समस्य होमवत् हुत्वा द्वितीयस
मिदाधानादि प्रातराहुती कार्ये। इति विशेषः। आपस्तंबानां तु न द्वितीयसमित्। सर्वत्र पर्वणि सायंहोमः। प्रतिपदि
च प्रातर्होमः पृथगेव कुर्यात्। तदुक्तं स्मृतिभास्करे। सर्वत्रोपवसथ्याहे सायंहोमः पृथग्भवेत्। तथैव यजनीयाहे प्रा
तर्होमः पृथग्भवेदिति। कृतेपि पक्षहोमादौ कुंडे प्रत्यक्षमेवाग्निधारणे प्राशस्त्यमुक्तं। तत्रैव। उत्तमो ग्निष्टेन। कुंडे आत्मा
रोपस्तु मध्यमः। समिध्यारोपणं त्वंत्यं तस्मात्कुंडे वधारयेदिति। यजमानस्य प्रवासप्रसक्तौ होमांते देशकालौ संकी
र्त्य प्रवासं करिष्य इति संकल्प्याग्नीन्प्रणीयकर्मांगमाचम्य निक्रम्य आहवनीयपश्चात्स्थित्वा तमेवोपतिष्ठते। शस

राम०
११

प्रभूमे पाहीति गार्हपत्यस्य पश्चान्निष्ठेन्। नर्यप्रजां मे पाहीति दक्षिणाग्नेः पश्चान्निष्ठन्। अथर्व पितुं मे पाही। तत्र स्थः स
व गार्हपत्याहवनीयाववेक्षेत। इमानग्ने मित्रावरुणा गृहा गोपायतं युवं। अविनष्टा विहृता मूषे नानाभिरक्षत्वस्माकं पुन
रायतनादिति। यथैतं प्रश्नेत्यस्मिन्नदेशे गार्हपत्यमुपस्थितिः। दक्षिणं परियन्नाहवनीयमुपतिष्ठते। मम नाम प्रथमं
जातवेदः पिता माता च दधतुर्यदग्रे। तत्त्वं बिभृहि पुनरामदेतोस्तवाहं नाम बिभराण्यग्ने। प्रव्रजेदनवेक्षमाणः। प्रागा
मयथा एवं यमा यज्ञाद्दिदं सोमिनः। निशीमहि। जयन्नारादग्निभ्यो वाचं विसृजेत्। पंथानमारुह्यकार्यं समाप्तौ। अपि पं
थामगन्मवस्व। प्रत्येत्य समिधाणि र्वाग्यतोग्नीञ्ज्वलतः श्रुत्वाभिक्रम्याहवनीयमीक्षेत। विश्वदानीमाभरंतोनातुरेणम
नसा। अग्ने मा ते प्रतिवेशा रिषाम। नमस्ते अस्तु मीढुषे नमस्त उपसद्वने। अग्ने शुंभस्व तन्वः संमा रय्या सृज। अग्निष्टुस
मिध उपनिधायोपतिष्ठते। मम नाम तव च जातवेदो वाससी इव विवसानौ ये चराव हः। ते बिभवोदक्षसे जीवसे च यथा य
थान्नौ तन्वो जातवेदः। ततः समिधो भ्यादध्यादाहवनीये। अगन्म विश्ववेदसमस्मभ्यं वसुवित्तमं। अग्ने संम्राडभिद्युम्न

ममिसह।आपच्छस्वस्वाहा।गार्हपत्ये।अयमग्निर्गृहपतिर्गार्हपत्यः प्रजया वसुवित्तमः।अग्ने गृहपतेभिद्युम्नमभिसह आ
यच्छस्व स्वाहा।दक्षिणाग्नौ।अयमग्निः पुरीष्यो रयिमान्पुष्टिवर्द्धनः।अग्ने पुरीष्याभिद्युम्नमभिसह आगच्छस्व स्वाहा।गा
र्हपत्याहवनीयावीक्षेत।इमान्मे मित्रावरुणा गृहान्गोपायतं युवं।अविनष्टान्विहृतान्पूषेनानभिरक्षतु आसाकं पुन
रायनादिति।अनुपस्थिताग्निः प्रवासमापद्यते।इहैव संतत्र संतं त्वाग्ने हृदा वाचा मनसा वा बिभर्मि।तिरो मा संतं मा
प्रहासीर्ज्योतिषा त्वा वैश्वानरेणोपतिष्ठन्ते।प्रतिदिशमग्नीनुपस्थाय।प्रत्यनुष्ठानं पूर्ववत्।इति प्रवासविधिः।सगृहप्र
वासप्रसक्तौ त्वसमारोपः कार्यः।स यथा।प्रातरग्निहोत्रहोमांते गार्हपत्यं प्रज्वाल्य सपत्नीकोऽरणीद्वयं गार्हपत्ये प्र
तितपेत्।पाणीवा।अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः।तं जानन्नग्न आरोहाथा नो वर्द्धया रयिं।इति मंत्रेणारणी
निष्ठ्या पाणी समारोपे।या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानमच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि यज्ञो भू
त्वा य[..]ज्ञमासीद स्वां योनिं भुव आजायमानः।इति पाणिं प्रतप्य पाणिं यासं भाराणां दाय जायापती अरणी संस्पृशन्त

गृहमर्यादायाममर्यादां नदीमर्यादां चातिक्रम्य गच्छेतां।वसतिस्थानं प्राप्य शुचौ देशे आयतनानि कृत्वा शुचिराचम्यायत
नान्युक्ष्यावोक्ष्य गार्हपत्यस्य पश्चादरणी निधाय मंथयेत्।यदि पाण्योः समारोपः।तदारणी संस्पृश्य मंथयेत्।उपाव
रोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन्।प्रजां पुष्टिं रयिमस्मासु धेह्यथा भव यजमानाय शंयोः।इति मंथेत्।
पाणिसमारोपे मंथयेत्।अजायमाने तु पुनः पुनर्मंथनारंभे मंत्रआवर्तनीयित्यमः।मथितमग्निं शरावादौ प्रक्षिप्य प्रज्व
लितं कृत्वा गार्हपत्यायतने निधाय काले काले होमादि कुर्यात्।पत्न्या रजस्वलायां सपिंडानां जनने मरणे चाशौचमध्ये य
जमानः प्रवसेत्तत्वे तदग्नेर्लौकिकत्वं तु उक्तं संग्रहे।रजोदोषसमुत्पन्ने त्वंतरा मृतसूतके।प्रवसन्नग्निमान्विप्रः पुनरा
धानमर्हति।तथा पत्न्युपपत्त्यो स्वहृषभादियानेन गमनेऽप्यग्नेर्लौकिकत्वं प्रायश्चित्तं चोक्तं तत्रैव।खरोष्ट्रवृषभं नारीस
मारुह्याथवा पुमान्।योजने योजने कृच्छ्रं अग्नयो वै विनश्यति।प्रवासादन्यत्र पत्न्याश्च संचारे अनुच्छिन्नमक्षमेव
सह भस्मानमग्निं नयेत्।तत्र जायापत्योर्यस्य कस्यचिच्छाखां संनिर्गमेत्।अग्नेर्लौकिकत्वमेव।त्रिकांडमंडने तु तृतीय

रु.इ०
१३

ष्ठासेलौकिकत्वमिति। तेनैवंयाज्ञिकाः कुर्वंति। शुचौ देशे मध्येग्निं निधाय श्वासं त्यक्त्वा श्वासः स्वस्थो भूत्वा पुनः श्वास
निरोधं कृत्वाग्निमादाय गच्छेदिति। आपस्तंबानां नैष श्वासनिरोधः। तथा त्वेनापि निरुद्धेनाग्ने लौंकिकत्वं। उक्तं च शत
ह्यं। विनाग्निभिर्यदा पत्नी नदीमंबुधिगामिनी। अतिक्रामेत्तदाग्नीनां विनाशः स्यात्तदा श्रुतिः। तथा विहरणकाले सीमा
तिक्रमणे पत्नी अग्ने लौंकिकत्वं। तदुक्तं तत्रैव। विहारकाले यदि कार्यदोषात्पत्नी तु सीमानमतीत्य गच्छेत्। निःसंशयो
ग्निः खलु नाशमेति गृहस्य सीमा च विवक्षितोर्थः। छंदोगपरिशिष्टेतु। विशेषः। विहायाग्नी सभार्यश्चेत्सीमामुल्लंघ्य ग
च्छेति। होमकालात्यये तस्य पुनराधानमर्हति। तथा समारोपितं यत्र आशौचमध्ये पर्वप्राप्तं चेत्तदा आपस्तंबाश्वलायनयो
रुपावरोहणप्रत्यवरोहणमंत्रयोरनधिकारादग्नेर्लौकिकत्वमिति भट्टकमलाकरेरुक्तं। दिनकरोद्योते तु श्रौते कर्मे
णितत्कालं स्नातः शुद्धिमवाप्नुयादिति वचनात्। यथाग्निहोत्रहोमादौ अधिकारस्तद्वदत्रापीति। अतस्तस्मिन्नेनाग्ने लौं
किकत्वं इति। यथा शतयोजनदेशांतरतस्तदाग्नि लौंकिकस्यादिति त्रिकांडमंडनः। अहं स्वयमनुष्ठानेन अग्निहोत्रं

रा.म०
१३

विनश्यति। इति कारिकाकारः। बौधायनमते तु निमित्तद्वयेपि प्रायश्चित्तार्थं पवित्रेष्टिः कार्येति। श्रीवरखेडी श्रीनि
वासतम्मलाचार्यो अस्तु नो भूयात्तां ॥ ॥ इति प्रतिष्ठानपुरवासी नोरो नारायणात्मज रुद्रदेवकृते प्रतापनारसिं
हे आपस्तंबाश्वलायनयोरग्निहोत्रहोमप्रवासविधिः ॥ ॥ अथ प्रसंगादग्निहोत्रप्रायश्चित्तान्युच्यंते। अथानु
द्धरणप्रायश्चित्तं। तत्रोद्धरणप्रभृति अपरेण हवनीयं कूर्चे सादयित्वा स्नात्वा कृत्वा श्रीपरमेश्वरप्रीत्यर्थं अनुद्धरणप्रा
यश्चित्तान्युच्यंते। अथानुद्धरणप्रायश्चित्तार्थं मनोज्योतिस्त्वयपास्वि ॐ शतं तवइमे ताभ्यां हे चतुर्गृहीते होष्यामीति संकल्प्य
अनुस्मृतमासं जुह्वां चतुर्गृहीत्वा। मनोज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञं ॐ समिमं दधातु। या इष्टा उषसो निम्रुचश्च
ताः संदधामि हविषा घृतेन स्वाहा। मनसे ज्योतिष इदं। अपरं चतुर्गृहीतं गृहीत्वा। त्वयपास्वि ॐ शतं तवो येवितन्विरे
य इमं यज्ञं ॐ स्वधया इदं ते। तेषां छिन्नं प्रत्येतद्दधामि स्वाहा धर्मो देवा ॐ अप्येतु स्वाहा। देवेभ्य इदं सर्वप्रायश्चित्तं
हुत्वा विष्णुं स्मृत्वा विधुद्रसी मपउपस्पृश्य सपत्नेषु अग्नइमादि होमं समापयेदिति। संक्षेपतो नुद्धरणप्रायश्चित्तमा

रुद्र°
१४

पत्नीं वसिष्ठोक्तं। आश्वलायनानामपि स्वसूत्रोक्तप्रायश्चित्तं कर्त्तुं अशक्यत्वात्। सूत्रांतरोक्तं कर्तव्यमिति श्रीमद्दाबाशुक्ल
दीक्षितकृतप्रायश्चित्तसारे उक्तत्वात् सर्वोक्तमेव प्रायश्चित्तं। तत्रोद्धरणादिष्वाहवनीयसमीपे कुशेषूपसादितेषु ते तूष्णीं
पवित्राभ्यामाज्यमुत्पूयते नैकैकचतुर्गृहीतत्वात् सर्वोक्तमंत्राभावाज्ज्ञात्वा सर्वप्रायश्चित्तं विसृज्य स्मृत्वा समिदाधानादि प्रति
पद्यते। अथ होमकालातिक्रमे प्रायश्चित्तं। तत्रोद्धरणोत्तरं दैवान्मानुषाद्वा सायं नवनाडिका अतीताश्चेत्तदा देशकाल
कथनांते कालातीतप्रायश्चित्तं करिष्य इति संकल्प्य लौकिकाज्यं जुह्वां चतुर्गृहीतं गृहीत्वा। आहवनीये जुहोति। दोषाव
स्तर्नमः स्वाहेति। अग्नय इदं। सर्वप्रायश्चित्तं हुत्वा विश्वदानीमाभरमित्यादि प्रतिपद्यते। एवं प्रातः दश नाडिकात्यये
पि तत्र होमे प्रातर्वस्तर्नमः स्वाहेति। अग्नय इदं। सर्वप्रायश्चित्तं चेति। इदं प्रायश्चित्तं आपस्तंबाश्वलायनयोरपि। आश्व
लायनसोत्सृत आज्येन होम इति विशेषः। अनुद्धृतश्चेत्तदा नकालात्यय प्रायश्चित्तं। यदि दैवान्मानुषाद्वा निमित्तात्सात
होमस्य लोपः। सायंहोमः प्रातश्चेत्तदा उद्धरणात् पूर्वं देशकालौ संकीर्त्य होमलोपे सन्नहोतारं होष्यामीति संकल्प्य आ

उ१

राम°
१४

रुद्र°
१५

होमं कृत्वा लौकिकाग्निं परित्यज्य उत्तरं मंथयेत्। देशकालौ संकीर्त्य अनुगतं गार्हपत्यं उत्पादयिष्यामीति संकल्प्य इतः प्रथमं
जज्ञे अग्निः स्वाद्योनेरधिजातवेदाः। स गायत्र्या त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन्निति मंत्रेण मथित्वा जातम
ग्निं अग्ने सम्राडिषे रय्यै रमस्व सहसे द्युम्नायोर्जे पत्याय। इत्यभिमंत्र्य। सम्राडसि स्वराडसि सारस्वतौ त्वोत्सौ समिंधाताम
न्नादं त्वान्नपत्याय। उपसमिध्य। तूष्णीं गार्हपत्यायतने निधाय पूर्ववत्प्रणीय तपस्वती इष्टिः। इध्म शक्तौ मित्रादि होमः।
स यथा। देशकालौ संकीर्त्य गार्हपत्यानुगतनिमित्तं तपस्वतीष्टिस्थाने मित्रादीन् होष्यामीति संकल्प्य लौकिकाज्यं स्रु
वेण जुह्वां चतुर्गृहीत्वा जुहोति। मित्राय स्वाहा। वरुणाय स्वाहा। अग्नये। अग्नये व्रतपतये। अग्नये तपस्वते जनद्वते
पावकवते स्वाहा। अग्नये शुचये। अग्नये ज्योतिष्मते स्वाहा। सूर्याय स्वाहा। भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा। भूर्भुवस्सु
वः स्वाहा। यथालिंगं त्यागः। केचिदेतद्धोममाहवनीये इच्छंति। तदा आहवनीयमात्रं प्रणीय मित्रादीन् हुत्वा तं विसृज्य
इष्ट्वा दानाद्यग्निहोत्रहोमः कार्यः। अनुगच्छाभ्यां उदयास्तमये गार्हपत्यानुगमने सर्वानुगतिनिमित्तं पुनराधानमेव

राम°
१५

हवनीयमात्रं प्रणीय लौकिकमाज्यं चतुर्गृहीत्वा महाहविर्होता मा दिक्षया सउद्गाते त्वं ते वाचस्पते हृद्विधे नामन् विधेम ते
नाम विधेस्त्वमस्माकं नाम वाचस्पतिः सोमं मपात् मा दैव्यस्तंतुश्छेदि मा मनुष्यो नमो दिवे नमः पृथिव्यै स्वाहा। वाचस्पतये
ब्रह्मण इदं सर्वप्रायश्चित्तं हुत्वा विसृज्य स्मरेत्। ततस्तमग्निं परिसमूह्य कालप्राप्तहोममुद्धरणपूर्वकं कुर्यात्। एवमष्टहोम
पर्यंतं प्रतिहोमे सत्रहोत्रा अनेकहोमलोपे परिराकरणं वा होतुहोम इति केचित्। आम्बुलापनागां होमलोपे मनस्वती
होमः। तत्रप्रयोगः। देशकालकथनांते होमलोपे मनस्वत्या चतुर्गृहीतं होष्यामि। आहवनीयं प्रणीय आज्यमुत्पूय स्तुचि
चतुर्गृहीतं गृहीत्वा। मनो ज्योतिर्जुषताम् … घृतेन स्वाहा। मनसे ज्योतिष इदं। सर्वप्रायश्चित्तं हुत्वा विसृज्य स्मरेदिति विशेषः
।अथ उद्धरणकाले गार्हपत्योऽनुगच्छेत्। तत्रोष्मा चेत् तत्र तैलं प्रक्षिप्य आपतनमाच्छाद्य घटिकामात्रं प्रतीक्ष्य तत्राग्निरु
त्पद्यते तेनाग्निना उद्धरणादि कुर्यात्। यदि नोत्पद्यते तदा तेभ्य एवावक्षाणेभ्यो मंथितव्यः। अवक्षाणाभावे भस्मनारणी
संस्पृश्य मंथने क्रियमाणे यदि न जायेत तदा लौकिकाग्निमाहृत्य गार्हपत्यायतने निधाय पूर्णाहुत्यादानादि मार्जनांतं

।गार्हपत्यस्यान्यथोत्पत्तावपि एकस्मिन्होमकाले अतीते पुनराधानं। उदयास्तमयायोस्तु सर्वस्मृतं नेयथा शास्त्रमेव। पक्ष
होमे कृते प्राक्करणकाले प्येतदेव। तत्रोत्तरयोः सर्वेकर्मणां वान पुनराधानं। उद्धरणोत्तरप्रधानहोमात्पूर्वं गार्हपत्यो
ऽनुगच्छेत्तदा आहवनीयं दक्षिणाग्निं चानुगमयित्वा गार्हपत्यस्य भस्मना निस्तारणी संस्पृश्य मंथनादि मित्रादिहोमान्न्या
कृत्वा आहवनीयं। वाचा त्वा होत्रेत्यनेन प्रत्यवरोहेति प्रविश्यामीति दक्षिणाग्निं प्रणीय अन्वग्निरुषसामग्रमख्यदन्व
हानि प्रथमो जातवेदाः। अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततान। इत्यनेन मंत्रेणाहवनीयं प्रणीयाह
वनीय एव तत्प्रत्युत्पत्ति स्थाने मित्रादीन्हुत्वा। होमं कुर्यात्। प्रधानहोमोत्तरं तु नाहवनीयदक्षिणाग्न्योरनुगमनं प्र
वीक्ष्य प्रकारेण गार्हपत्यस्योत्पत्तिं कुर्यात्। अवशिष्टहोमकर्मणस्तु लोप एव। प्रणयनप्रभृति प्राग्घोमकालादाह
वनीयोऽनुगच्छेत्। कालद्वये गार्हपत्यात्पुनः प्रणीय ज्योतिष्मतीष्टिस्थाने मित्रादीन्होष्यामीति संकल्प्य। आहवनी
ये मित्रादीन्हुत्वा कृतान्तादारभ्य होमशेषं समापयेत्। प्रणयनप्रभृति प्राग्घोमकालाद्दक्षिणाग्न्यनुगमने एतं

प्रविशानीति गार्हपत्यात्पुनः प्रणीय दक्षिणाग्न्यनुगमनप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामीति संकल्प्य । आहवनीये दक्षि-
णाग्नौ वा सर्वप्रायश्चित्तं हुत्वा कृतं तन्त्रादारभ्य होमशेषं समापयेत् । आहवनीये होमोत्तरं दक्षिणाग्न्यनुगमने न तस्य नीत्य-
त्रिः । तत्कर्मणां लोप एव । यदि प्रथमाहुतिकाले आहवनीयोऽनुगच्छेत् तदा प्राणाउदानमथ गार्हपत्ये स्वाहा । इत्याज्याहु-
तिं गार्हपत्ये हुत्वा समंत्रमाहवनीयं प्रणीय सर्वप्रायश्चित्तं आहवनीये हुत्वा प्रकृतिवदग्निहोत्रहोमः । नानुगतेष्टिर्भिन्ना-
रयो वा । विशेषेण सामान्यबाधात् । एवं गार्हपत्यानुगते । उदानः प्राणमथगा स्वा० इत्याहवनीये हुत्वा निर्मारणीभस्म-
नासंसृश्य मंथयेदित्यादि गार्हपत्यमायतने निधाय सर्वप्रायश्चित्तं । तत्रैव हुत्वा ततो होमसमाप्तिर्नान्यत्प्रायश्चित्तं ।
एवं दक्षिणाग्न्यनुगमने व्यानउदानमथगा त्वाहेति गार्हपत्ये हुत्वा योनितउर्त्य प्रसर्वप्रायश्चित्तं दक्षिणाग्नौ हुत्वा
पूर्ववद्धोमसमाप्तिः । पूर्वाहुतौ हुतायां यथाहवनीयोऽनुगतः तदा यस्मात्काष्ठादग्निरुपशांतः, तं लिंछकलेशकला- राम०
भावे तत्र हिरण्यं निधाय प्रकृतिमंत्रस्थाने । अग्निर्दारौ दारावग्निस्वाहा । इति मंत्रेण हुत्वा गार्हपत्यदक्षिणाग्न्योर्हुत्वा १६

आहवनीये स्रुचं प्रतापतस्येव परिसमूहनपरिषेचनपर्युक्षणाद्यर्थत्रयाणां लोपः । तत्राग्नेरभावात् । आहवनीये होमे
कृतेऽग्न्यंतरेऽनुगते नोत्पत्तिः । तत्कर्मणां लोप एव । अनाज्ञातत्रयं जपेत् । गार्हपत्यस्यान्तु सर्वावस्थयानुगमने मंथनं तपस्व-
तेष्टिर्भिन्नारयो वा । इति आपस्तंबप्रायश्चित्तं । आश्वलायनानां उद्धरणकाले गार्हपत्येऽनुगते भस्मनारणीं संसृश्य इतो
जज्ञे प्रथमेभ्यो योनिभ्यो अधि जातवेदाः । स गायत्र्या त्रिष्टुभा जगत्यानुष्टुभा च देवेभ्यो हव्यं वहतु नः प्रजानन् । इति मथित्वा
गार्हपत्यस्थितभस्मापोह्य तदायतनं गोमयेनोपलिप्य मथितमायतने निधाय आहवनीयमात्रं प्रणीय पवित्राभ्यां आज्य-
मुत्पूय पवित्रे वेद्यां विसृज्य स्रुक्स्रुवमाहवनीये निष्टप्य संमृज्य स्रुचि द्वादशगृहीतमष्टगृहीतं चतुर्गृहीतं वा गृहीत्वा गा-
र्हपत्यानुगमनप्रायश्चित्तार्थं तपस्वतीष्टिस्थाने पूर्णाहुतिं होष्यामि । अग्नये तपस्वते जनद्वते पावकवते स्वाहा । अग्न-
ये तपस्वते सर्वप्रायश्चित्तं विष्णुस्मरणं च । मंथनादर्जा तेऽपि पावकजन्मतावन्मथितव्यमेव । ततः तपस्वतीष्टिः पूर्णाहु-
तिर्वा । ततोऽग्निहोमः । उद्धृतप्रायश्चित्तेन सह यदि होमकालोऽपि गतस्तदा मनस्वती होमोऽपि कार्यः । अथ प्रणयनोत्तरं

रुइ०
१७

आहवनीये विद्यमाने गार्हपत्योऽनुगच्छेत्। तदा आश्वलायनस्यावक्षाणिभ्यो मथित्वाहवनीयमनुगमयित्वा पुनर्विहरणं। क्षा
माभावे भस्म। नारणीसंस्पृश्य मंथयेत्। इतो जज्ञ इति। पुनस्तूष्णीं धरणीयाहवनीयमुपतिष्ठते। अग्ने संयालिषे रयेरमस्व
सहसे द्युम्नायोर्जे पत्याय। संम्रालसि स्वराळसि सारस्वतौ त्वोत्सौ समिंधातामन्नादं त्वान्नपत्यायादध इति। ततस्तल्पस्तती ष्टिः
पूर्णाहुतिर्वा विस्मरणं च। ततो होमः। अग्निहोत्रद्रव्याधिश्रयणार्थं गार्हपत्यादुद्धृतेष्वंगारेषु यदि उद्धृतस्य च गार्हपत्य
स्य च नाशः। तदा गार्हपत्यं मथित्वा तत्पस्तती ष्टिर्मित्रादिर्वा विधाय पुनरंगारनिर्हरणादि होमं समापयेत्। अपोह्मानानु
गमने पुनरपोह्य सर्वप्रायश्चित्तमाहवनीये हुत्वा यजुर्भेषप्रायश्चित्तं दक्षिणाग्नौ जुहुयात्। अपोद्दे वर्तमाने गार्हपत्या
नुगमने अपोह्यैकदेशं गार्हपत्ये निधाय सर्वप्रायश्चित्तं यजुर्भेषप्रायश्चित्तं च। इत्यनुगतप्रायश्चित्तं। अथोपघातप्राय
श्चित्तं। परिषेचनादौ हविःप्रोक्षणादौ च जलबिंदवोऽग्नेरुपरि गच्छेयुः तदा उपघातप्रायश्चित्तं करिष्य इति संकल्प्य। पु
नस्त्वादित्या रुद्रा वसवः समिंधतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः। घृतेन त्वं तन्वो वर्धयस्व सत्याः संतु यजमानस्य का

राम०
१७

माः। इति समिधमादध्यात्। एवं मलोपहतौ समिदाधानं सर्वप्रायश्चित्तं च। तच्च द्वादशविधमलाः। ते च। वसा शुक्रमसृ
ङ्मज्जा मूत्रविट्कर्णविट्नखाः श्लेष्मा अश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः। तत्र श्वनकुलमार्जारमर्कटध्वांक्षाखु
पुरीषस्पर्शप्रदोषहते पुमूत्रस्पर्शने शकृत्पिंडादावस्थिनिर्गमने नचोपसमिधं नं सर्वप्रायश्चित्तं च रजस्वला महाचां
डाल महापतितादिस्पर्शने पुनराधानं। इत्युपघातप्रायश्चित्तं। अथाग्निहोत्रद्रव्यं पयसाग्नौ अधिश्रितं शरशब्दं कुर्व
त् समीपपाभ्यानमित्यभिमंत्र्य आहवनीये सर्वप्रायश्चित्तं हुत्वा विस्तुं स्मरेत्। प्रकृतिवद्धोमं कुर्यात्। आश्वलायनानां
मपीदं समानं तत्रोत्तरत्राज्येन होम इति विशेषः। अग्निहोत्रद्रव्यमधिश्रितं केशकीटादिना व्याप्तं तदा तत्सर्वं स्रुचि
प्रक्षिप्याहवनीयं प्राग्वत्तूष्णीं समिधमाधाय आहवनीयादुत्तरत उष्णं भस्म निःसार्य तस्मिन्सर्वं हुतं जुहुयात्। मन
सा मंत्रमुच्चारयेत्। एवमुन्नेत्रेव मेव प्रकारः अग्निहोत्रस्थालीं प्रक्षाल्यान्यद्दुग्धमानीयाधिश्रयणादि कुर्यात्।
आपस्तंबानां। इषासि। अयस्मावः। द्यौश्चेमं। उत्तानेहीति मंत्राणां जप मिश्रेके। इतरत्समानं। यदि केशकीटाद्युप

नेतंशक्यतदपनीयस्थालीगतंद्रव्यंप्रोक्ष्यतेनैवजुहुयात्।अपिवातद्द्रव्यमप्सुप्रक्षिप्यद्रव्यांतरमुत्पाद्यजुहुयात्।तंदुला
दिद्रव्येष्वेवं।अग्निहोत्रद्रव्येअभिदुष्टेमित्रोजनान्यातयतिब्रुवाणोमित्रोदाधारपृथिवीमुतद्यां।मित्रःकृष्टीरनिमिषाभिचष्टे
मित्रायहव्यंघृतवज्जुहोतेतिमंत्रेणसमिदेकमाहवनीयेजुहुयात्।सर्वप्रायश्चित्तंविस्तु॰आपस्तंबानामग्रदेतद्देवस्वस्ते
त्रेअनुक्तत्वात्।अग्निहोत्रद्रव्यमुद्वासनकालेविष्यंदेततदाविष्यंदनमात्रंमादायमहीद्यौःपृथिवीचनःमभिरिति मंत्रेण
हवनीयेभस्मांतेनिनीयततःस्थालीगतेनहोमंकुर्यात्।विष्यंदनेनाग्निंभूमिंवाप्राप्नुयात्तदास्थालीगतमपिदुष्टंतद्द्र
व्यमप्सुप्रक्षिप्याग्निहोत्रस्थालींप्रक्षाल्यान्यमानीयपूर्ववज्जुहुयात्।इतिहविर्व्यापत्तिप्रायश्चित्तानि।अथस्कन्नप्रा
यश्चित्तं।यदिदुह्यमानंस्कंदेत्तदायदद्यदुग्धंपृथिवीमसृप्तयदोषधीरत्यसरद्यदापः।पयोगृहेषुपयोअघ्न्यासुपयो
वत्सेषुपयोअस्तुतन्मयीत्यभिमंत्र्य।समुद्रंवःप्रहिणोमिस्वांयोनिमपिगच्छत।अच्छिद्रःप्रजयाभूयासंमापरासेचिमत्त
पःइत्यप्सुक्षिप्यसर्वप्रायश्चित्तंहुत्वाशेषेणहोमः।यजमानपत्न्योरागामिहोमकालादनशनं।सर्वेस्कंदनेऽन्यांदुग्ध्वाहो

मः।स्थालीअयोग्याचेदन्यामादायसंस्कृत्यतस्यांदुग्ध्वाहोमः।भिन्नामप्सुप्रक्षिपेत्।अथतस्यदशावस्थाभवंति।दुह्यमा
नं१दुग्धं२हूयमाणं३हुतं४अधिश्रयमाणं५अधिश्रितं६उद्वास्यमानं७उद्वासितं८उन्नीयमानं९उन्नीतं१०।एतास्व
वस्थासुअसर्वस्कंदनेपूर्वोक्तस्कन्नप्रायश्चित्तंकृत्वाशिष्टेनैवयथाकथंचिद्धोमः।सर्वस्कंदनेस्कन्नप्रायश्चित्तंविधायान्य
गांदुग्ध्वाहोमः।एवमन्यद्रव्येतदायहोमः।चतुर्वन्नीनांचतुर्थ्यामाज्यस्कंदनेस्रुचिगतंस्थाल्यामानीयपुनरुन्नीयहोतव्यं
।चतुर्थोन्नयनोत्तरंसर्वस्कंदनेअस्कांद्यौःपृथिवीमस्कानृषभोयुवागाः।स्कन्नेमाविश्वाभुवनास्कन्नोयज्ञःप्रजनयतु
।अस्कानजनिप्राजन्यास्कन्नाज्जायतेवृषा।स्कन्नात्प्रजनिषीमहि।इतिस्कन्नमभिमंत्र्य।उन्नंभयपृथिवींभिंधीदंदि
व्यंनभः।उद्रोदिव्यस्यनोदेहीशानोविसृजादृतिं।इत्यद्भिरप्सुक्ष्यपुनस्स्थालीगतंउन्नीयहोमः।असर्वस्कंदनेस्कन्न
मात्रमभिमंत्र्याप्सुक्ष्यपूर्वोक्तमंत्राभ्यांततःशेषेणहोमः।भस्मस्यलोपः।तदेतमृतुवमात्रस्कंदने।स्रुवाहूनेत्तनप्रा
यश्चित्तं।उन्नीतंस्थालीगतंचोभयस्कन्नेतत्स्कन्नाभिमंत्रणाप्सुक्षेपणेकृत्वापुनरन्यांदुग्ध्वाहोतव्यं।जायापत्योर

नशनं च। ऊर्ध्वं तरिक्षवीहीमादारभ्य दशहोतृसमाप्तिपर्यंतं यदि स्रुचो देशे स्कंदेत्। तदा स्कन्नप्रदेशे उपविश्य स्कन्नं पुनः
स्रुचि गृहीत्वा तदेव याहृकी हस्केहोतव्यं मार्जनांते पृष्ठ्याद्यनादिहोमं कृत्वा दृष्टिरसीत्यप उपस्पर्शने कृते न्तु ह्वांसकृद्गृही
त्वं गृहीत्वा। अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः। क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्रथः कृतानि
। उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा। इति मंत्रा
भ्यां हुत्वा होमशेषं समापयेत्। अशुचिदेशे स्कंदने अस्कानि त्वादिशा प्रायश्चित्तं विधाय वारुणाभ्यामेकामाहुतिं हुत्वा
पुनः स्थालीत उन्नीय होमशेषं समापयेत्। यजमानपत्न्योरशनं चारशहोतृसमाप्त्यनंतरं प्राक्कुशसमीपसादना
त्। स्कन्ने स्कंनाभिमर्शनादि कृत्वा। अत्र स्कन्नमन्यद्द्रव्यं क्षिप्त्वा होमः कर्तव्यः। यदि दर्भेषु सादयमानं स्कंदेत् तदा सर्वं स्कं
दने च स्कन्नाभिमर्शनादि कृत्वा स्कन्नं स्रुक्समीपे अन्यत्सजातीयद्रव्यं प्रक्षिप्य होमः। दर्भेषु स्थापिते पूर्वाहुतेः
पूर्वं स्कन्ने अभिमर्शनादि कृत्वा स्कन्नादारभ्य होमात्पूर्वं यदि स्कन्ने केशविकारो नित्यत्वेन पुनर्होममिच्छंति। रु

द्रदत्तस्तु विकल्पेन इच्छंति। यदि क्रियते तदा पूर्ववत् कर्तव्यः। पूर्वाहुतौ हुतायां अवशिष्टं यदि स्कंदेत् पूर्वाहुतौ
सर्वं प्राप्तेत। तदा स्थाल्या द्विरस्रुन्नीय। यत्र वेत्थ वनस्पते देवानां गुह्या नामानि। तत्र हव्यानि गामय इति वानस्पत्य
चोसमिधमाधाय। उत्तराहुतिं च हुत्वा पुनः होमं च कुर्यात्। आप्यायनानामप्येवं। न तत्र पुनर्होमः। अल्पावशि
ष्टे तेनैव होमः। स्रुवमात्रा द्रव्यस्कंदने सर्वप्रायश्चित्तमेव भस्मकूर्चादौ स्कंदने विशेषः। भस्मन्यग्नौ हविर्धाने वेद्या
स्तीर्णे च बर्हिषि कूर्चे च विप्रपाणौ च स्कन्ने दोषा न विद्यत इति। तंडुलादिपयो व्यतिरिक्तकठिनद्रव्यस्कंदने आप्याला
यनानां देवाञ्जनमगन्यज्ञस्ततस्समाशीर वतु वर्द्धतां। भूतिर्हुतेन मुंचतु यज्ञो यज्ञपतिमंहसः। भूपतये स्वाहा। भुवनप
तये स्वाहा। भूतानां पतये स्वाहा। यज्ञस्य त्वा प्रमयाभिमयाप्रतिमया उन्मया इत्यस्क्स्कंद। एतेन स्कन्नमभिमृश्य स
र्वप्रायश्चित्तं हुत्वा स्कन्नद्रव्यमप्सु निक्षिप्य आप्यायनानां। अथैतदेव तंडुलादिद्रव्येषु विकल्पेन भवति। सायंहोमे सू
र्यो ज्योतिरिति प्रमाद्मंत्रपठितः त्यागश्च कृतः। तदा स्कन्नवत्पुनर्होमः। एवं प्रातः। इति स्कन्नप्रायश्चित्तानि। अथा

रु०इ०
१०

ग्निहोत्रे ऽन्तरागमने आपस्तंबानां अग्निहोत्रे अधिश्रिते ऽन्तरा यदि श्वा गच्छेत् तदा गार्हपत्याद्भस्म गृहीत्वा गार्हपत्यादा
हवनीयपर्यन्तं इदं विष्णुरित्यनेन भस्मलेखां कुर्यात्। तेनैव मन्त्रेण भस्मना पुनः पदं प्रतिवपेत्। सर्वप्रायश्चित्तं। उद्वा
सनादूर्ध्वं पूर्वोक्तं विधाय केन षो स्वर्णं गोराक्रमणं चाधिकं। एवं मार्जारमनुष्यगमने च। आश्वलायनानां अग्निहो
त्रद्रव्ये कुशीघ्रप्रसादिते ऽन्तरा श्वा पुरुषो वा गच्छेत् तदा गवादिक्रमणं पुनर्गमने भस्मना पु। नः पदं प्रतिवपेदिदं वि
ष्णुरिति मन्त्रेण प्रतिपदं मन्त्रः। भस्मधारां उदकधारां च तन्तुं तन्वन्निति मन्त्रेण गार्हपत्यादाहवनीयपर्यन्तं अविच्छि
न्नां कुर्यात्। प्रतिधारां मन्त्रावृत्तिः आहवनीयमनुगमयेत् पुनः प्रणीय यदग्ने पूर्वं प्रभृतं पदं हि ते सूर्यस्य रश्मीनन्वा
ततान। तत्र रयिष्ठमनु संभवेतां सन्नः सृज सुमत्या वाजवत्या। त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः। त्वया यज्ञं
वितन्वते। इत्येताभ्यामुपस्थाय। अग्निहोत्रं समाप्यान्तरागमनजन्यदोषपरिहारार्थं प्रायश्चित्तीष्टिस्थाने पूर्णा
हुतिं होष्यामि। आहवनीयं विहृत्य आज्यमुत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा अग्नये पथिकृते स्वाहेत्याहवनीये जु

रा.म.
१०

त्वा सर्वप्रायश्चित्तं यथाशक्ति दक्षिणादानं विष्णुस्मरणं च कुर्यात्। मार्जारगमनेऽप्येवं। इत्यन्तरागमनप्रायश्चित्तं। अन्त
रा वहिर्गमने प्रायश्चित्तं। प्रायश्चित्तसमाप्तिपर्यन्तं स्थितियोग्यस्तदा। परिव्राजपतिः कविः। अपुषे। इति त्रिः प्रदक्षिणी
कृत्य। इदं तमेकं पर उ त एकं तृतीयेन ज्योतिषा संविशस्व। संवेशनस्तन्वे चारुरेधि प्रियो देवानां परमे जनित्रे। इति मं
त्रेण यजमाने प्रतिष्ठाप्य सर्वप्रायश्चित्तं। इदं चाहवनीय एव। नान्याग्निषु। अन्येषु तु लौकीप्रक्षेपः। सर्वप्रायश्चित्तं। आ
श्वलायनानां तु परिव्राजपतिः कविरिति परिक्रमणं वर्जं सर्वं अग्निहोत्रहवणी भिद्येत। तदान्यमाहृत्य हुत्वा
भिन्नमग्निहोत्रहवणीमाहवनीये प्राक्दण्डां प्रत्यक्पुष्करां प्रास्य सर्वप्रायश्चित्तं जुहुयात्। एवं सर्वेष्वपि वनस्पतेषु
। आज्यस्थाल्यादिमृन्मयभिन्ने तु अप्सु त्यागः। आहिताग्निः प्रातरस्तानो अग्निहोत्रं जुहुयात्। तदाग्नेयमष्टाकपालं निर्व
पेत्। त्वं नो अग्ने स त्वं नो अग्न इति याज्यानुवाक्ये। पूर्णाहुतिर्वा जुहुयात्। यद्यनस्तमिते अस्तमितं मत्वा होमो भवति
। तदा तस्मिन्नेवाहवनीये पुनर्होमं कुर्यात्। होमोत्तरे यजमानो गार्हपत्याहवनीयावुपतिष्ठते। भवतन्नः समनसौ

मोकस्माद्वरेपसो मायजन्ꣳ शिवंमायजन्पतिंजातवेदसो शिवोभवतमद्यनः। इत्येवंप्रातः उदितहोमिनां अनुदि-
तहोमिनां उदयोत्तरं पुनराधानं यद्यग्निहोत्रहोममध्येग्रहणंचेत्तदा सूर्यग्रहे अपरेणाहवनीयंस्रुचंसादयित्वेतं सं-
तेहोममध्येग्रहणजन्यदोषपरिहारार्थं उद्वयंतमसस्परि· उदुत्यंजातवेदसं· चित्रंदेवानामित्येतैर्मंत्रैः आज्याहुत-
योर्होष्यामि इतिसंकल्प्य हुत्वोक्तमंत्रैर्हुत्वा सर्वप्रायश्चित्तं विष्णुस्मरणंच एषोतेअग्नइत्यादिप्रतिपद्ये आ-
श्वलायनानामप्येवं तत्राज्योत्पवनमधिकं प्रायश्चित्तसारेचंद्रग्रहेपिइदमेव भाष्यकारमतेचंद्रग्रहेनवोन-
वोयमादित्यादृशेताभ्यामाहुतिद्वयं सर्वप्रायश्चित्तंविष्णुस्मरणंच अग्निहोत्रहोमेयदन्यानिकानिचिन्नुपसमिं-
धनादूर्ध्वं आहवनीयहोमात्पूर्वं यदियजमानोऽग्नीयाग्निवेद्यान्तरायन्नेवंयेपुरुषत्रायविष्णाविह्वाꣳ सन्नक्रमा-
कन्नागः क्वथीत्स्वस्माꣳ अदितेरनागाव्येनाꣳ सिशिश्नयोविष्णग्नेयपाहतद्वसवोगोर्येचित्यदिषितामुखं
चतायजत्राः एवात्वमस्मत्वसुचाव्यꣳ हःशानायेत्प्रतरंनआयुरितिद्वाभ्यामाहुतिर्जुहुयात् जपेदित्येके

होमेऽग्निः स्विष्टकृद्देवताउपसमिंधनात्पूर्वंचेत्तदाव्रातपतीष्टिः पूर्णाहुतिर्वा एवंयत्किंचिदंगलोपेऽव्रय-
नेन्यूनाधिकेभावमंत्रक्रियाविपर्यासेकर्तव्यविपर्यासे यजमानपत्न्योरसंनिधानेव्रतलोपे मार्जारादीनामं-
तरागमनेऽस्मिन्नहातेरोषेऽनाज्ञातत्रयं· त्वमग्नेव्रत· यद्वोवयंप्रमि· त्वन्नोअग्नेवरुणस्य· सत्वन्नोअग्ने·
व्याहृतीश्चजपेत्· सर्वसांगतासिध्यर्थं विष्णुस्मरणंच इतिअग्निहोत्रहोमप्रायश्चित्तानिसमाप्तानि ॥
अथप्रसंगाद्दर्शपूर्णमासेष्टिप्रायश्चित्तानि तत्रादौ अन्वाहित· प्रायश्चित्तंआपस्तंबाश्वलायनयोः समा-
नमेव अन्वाधानानंतरंआहवनीयोनुगच्छेत्तदा अन्वाहितमाहवनीयमुद्वादयिष्यामीतिसंकल्प्यायत-
नभस्मदूरीकृत्य तदायतनंगोमयेनोपलिप्य अन्वग्निरुषसामग्रमख्यदन्वहानिप्रथमोजातवेदाः अनु
सूर्यस्यपुरुत्राचर[illegible]ीनतु द्यावापृथिवी आततानेतिमंत्रेणाग्निमाहवनीयंप्रणीयभूरितिमनसायजमानस्तु
पतिष्ठते असंस्कृतमाज्यं स्रुवेणाहवनीयेजुहोति योअग्निंदेववीतयेहविष्माꣳ आविवासति तस्मैपा

दृ०
११

वकम्रूउपस्वाहा अग्नयेपावकायेदं॰ ततोत्रुह्याः स्रुक्रुद्गृहीत्वा इदंविस्नु॰स्रुरेस्वाहा विस्नवइदं॰सर्वप्रायश्चि
त्तं यजमानोजपति अग्नेव्रतपते॰ वायोव्रत॰ आदित्यव्रतपते॰ व्रतानांव्रतपते॰ संवाउसि॰ध्यासमिति परिग
हेपत्नीतुगच्छेन्नदानइस्मनारणीसं स्पृश्य तत्ली मथित्वायतननिनिधायभूरिस्वुपस्थाय पूर्ववद्धुत्वा यजमानोपस्था
नांतं समानं दक्षिणाग्न्यनुगमने योनितउमाद्यभूरिन्त्यादि यजमानोपस्थानांतं समानं प्रणयनानंतरं अन्वाधा
नात्याक् आहवनीयानुगमने देशकालकथनांते प्रणयनानंतर माहवनीयानुगमने सर्वप्रायश्चित्तं होष्यामीति
संकल्प संस्कृतात्मे नाहवनीये सर्वप्रायश्चित्तं जुहुयात् एवं दक्षिणाग्नेरपिगमने पूर्वाग्निष्वग्निहोत्रहोममि
ष्यादिकान्यप्रायश्चित्तं पितृपितृयज्ञे स्को ल्मुकनाशेसर्वप्रायश्चित्तं हुत्वापुनर्दक्षिणाग्नेरानयनं अभा
गिनीसुचार्यनिर्वपेत्तत्संसृष्टहव्यं उल्केरस्त्रात्पुनर्भागि निर्वपत् सर्वप्रायश्चित्तं एवंद्रव्यव्यत्यासे तद्द्रव्यंप
रित्यज्यनिर्वापादिपुनर्यागः एवं निर्वापविस्मृतौ अंतरितप्रायश्चित्तं यद्वोदेवा सर्वप्रायश्चित्तं च हुत्वा पुनर्निर्वापं

रम०
११

कुर्यात् एवंप्रोक्षणादिमंत्रेषु देवताविपर्यासे सर्वप्रायश्चित्तं हविर्विशेषोद्वासनमकृत्वाअनूयाजार्थं यदा आश्रव
णंकरोति तदा यद्वोदेवा अतिपादयानीत्याहुतिं जुहुयात् यदि प्रणीताः आपो भूमौनिःशेषं पतेयुः शेषं वा गच्छे
युः तदा संवापात्पूर्वं तदा आपोहिष्ठेतितिसृभिः पुनर्गृहीत्वा ततमापइत्याग्नाहुतिं जुहुयात् स्कन्नावशेषेन
प्रायश्चित्तं शिष्टेनैव संवापं कृत्वा सर्वप्रायश्चित्तं संवपनादूर्ध्वं सर्वप्रायश्चित्तमेव दर्शपूर्णमासादौ हविः प्रोक्ष
णंकुर्वन्यद्यग्निमभिप्रोक्षेत् तदा पुनस्त्वादित्या इत्यनया समिदाधानं कुर्यात् उपधानात्प्राक् यदि कपालो नामन्य
तमं भिद्येत् तदा गायत्र्या त्वा शताक्षरया संदधामि इति संधानकरै ईषैः संधाय उपरि गार्हपत्ये धारयित्वा तस्योपर्या
ज्येन मनोज्योतिर्जुषतामित्याहुतिं हुत्वा ब्रह्मणा भूमिर्भूमिमगान्माता मातरमप्यगात् भूयास्म पुत्रैः पशुभिर्यो
नोद्वेष्टि स भिद्यतामित्यनेनाभिमंत्रणे कृते अभिन्नो घर्मो जीरदानुर्यत आत्तस्तदगन्पुनः इध्मो वेदिः परिधयश्च
सर्वे यज्ञस्यायुरनुसंचरंति इत्यप्सु प्रक्षिपेत् ततोऽन्यत्कपालमाहृत्य तस्य रजाभिमर्शन प्रोक्षणादि कृत्वा तत्र यथि

ॐ शन्नस्तव इति कपालं प्राकृपशुक्तेषु प्रक्षिपेत् उपहितेषु कपालेषु यदन्यद्भिद्येत तदा गायत्र्या त्वा शताक्षरयेत्यादिना
संधानादिश्च स्रुवप्रक्षेपांतं कृत्वाऽन्यत्कपालमाहृत्य भिन्नस्य कपालस्य स्थानेऽयहिं ॐ शन्नस्तव इत्युपदध्यात् कपाल
मधिश्रयणात्पूर्वं भिंदेत् नरो ह्यातस्य मही द्यौः पृथिवी च न इति स्रुवाहुतिं जुहुयात् ततो विधिनाऽन्यत्कपालमुप
धाय पुरोडाशाधिश्रयणादिकंरोति पुरोडाशो ह्यासन्नानंतरं भेदने नाशने सर्वप्रायश्चित्तमेव आश्वलायनानां तु क
पालं यदि भिद्येत तदा गायत्र्या त्वा शताक्षरया संदधामीति मंत्रेण संधाय अभिन्नो घर्मो·चरंति अयहिं ॐ शन्नस्तवो
पान्वित इमं यज्ञं स्वधया ये यजंते ताभिः छिद्रं प्रतिदभ्रो यजत्र स्वाहा यज्ञो देवाश्च प्येतु देवा इति मंत्राभ्यां जलेप्र
क्षिपेत् ततः सर्वप्रायश्चित्तं एवं श्वादिभिरवलीढानि [illegible]चिद्रव्य संसृष्टानि वा अभिन्नो घर्म इति मंत्राभ्यां जले प्रक्षि
पेत् सर्वप्रायश्चित्तं अन्यानि मृन्मयानि अशुचिस्पृष्टानि भिन्नानि वा भूमिर्भूमिमगादिति जले प्रक्षिप्य सर्वप्राय
श्चित्तं दर्शपूर्णमासयोरन्वाधानदिने यदि पत्नी रजस्वला तदा तामपरुध्य यागं कुर्यात् तत्र योक्त्रं वेदेः पश्चाडगयं

निधाय शेषे पत्नी संनह्येतिल्लुप्यते तेजोसीत्यधिश्रपणं तेजसे त्वेत्युपादानं च लुप्यते पत्नीसंबंधमुपस्थानादि
होत्रकर्म च पूर्णपात्रसंबंधि च लुप्यते संपत्नीहोममपि विधेय एवमिष्टिं समापयेत् ततो ऋतुगमने अमूहमस्मि
सा त्वं द्यौरहं पृथिवी त्वं ॐ सामाहमृक् त्वं तावेहि संभवाव सह रेतो दधावहै पुंसे पुत्राय वेत्तवै रायस्पोषाय सुप्रजास्त्वा
य सुवीर्याय पत्नी अनुपीत । ततो विष्णुर्योनिं मिमात्वित्यादि दशभिरृग्भिर्मंत्रहिं कालमनासुपेयात् बहुपत्नीकस्य पत्नीक
र्माणि अन्याभिः कुर्यात् एवं प्रसूतानां सूतकांतं एवेष्टिः एवं विकृतिषु अन्वाधानादूर्ध्वं तामपरुध्यैव यागः त
तः प्रागनारंभः प्रोषिते यजमाने अन्येह्नि क्रतुमती चेत्तदा पंचमेहनि यागः प्रथमपिंडपितृयज्ञारंभे यदि रजस्व
ला तदा दर्शांतरे सप्तहोतारं कृत्वा पिंडपितृयज्ञारंभः द्वितीयादौ न प्रतिबंधः दर्शपूर्णमासादिषु पवित्रकरणा
दूर्ध्वं प्रस्तरे प्रतिपत्तिपर्यंतं यदि मध्ये पवित्रं नश्येत्तदा पवित्रे स्थ इति पवित्रे कृत्वा विष्णोर्मनसा इमद्भिरुत्सृज्यते तेन
पवित्रेण कार्यं कृत्वा इष्टिं समाप्य पुनः प्राणायामादि प्रायश्चित्तार्थं अग्नये पवित्रवते अष्टाकपालं निर्वपेत् अश

क्रीतस्मिन्नेवेष्टितंत्रेप्रधानयागात्पूर्वंचतद्गृहीतमाज्यस्थाल्यावादाय अग्नयेपवित्रवतेस्वाहेतिपूर्णाहुतिंजुहुयात्
दर्शपूर्णमासयोरन्वाधानानंतरंप्रधानयागात्पूर्वंयदिग्रहणं स्यात्तदापूर्वोक्तमग्निहोत्रहोमवत्कुर्यात् एवंद्व्यहःसं
धार्यंविकृतावपि इष्टिमध्येभयेसमुपस्थितेयतइंद्रभयामहेस्वस्तिदाविशस्पतिरितिद्वाभ्यांहुत्वाकर्मसमापये
त् कर्तुमशक्यंचेत्तदासमारोप्यकालांतरेविशेषप्रायश्चित्तंकृत्वापथिकृन्मुखेनेष्टिंकुर्यात् जुह्वादीनांदारु
मयानांकालाद्युपहतौतक्षणमुष्णोदकेनक्षालनमितिराश्वमेधादिभिरत्यंतोपहतौत्यागः एवंमृन्मयादीनाम
पि अंतरामनुष्यमार्जारादिगमनेसर्वप्रायश्चित्तं आज्यस्कंदनेनिर्वापादिद्रुग्गेताम्नाज्ञानीत्यंतेस्कंदेयुस्त
दा देवांजनमगन्मइस्ततोमायज्ञस्याशीरागच्छतु पितृञ्जनमगन्यज्ञस्ततोमा॰ पंचजनांजनमगन्यज्ञस्ततो॰
दिशोजनमगन्यज्ञस्ततो॰ योजनमगन्यज्ञस्ततो॰ ओषधीर्जनमगन्यज्ञस्ततो॰ वनस्पतीजनमगन्यज्ञस्ततो॰ तु
इत्येतैःसप्तभिःस्कन्नमभिमंत्र्यकालेसर्वप्रायश्चित्तं स्रुगांतेचेत्तन्नमंत्रैःपुनर्ग्रहणं आज्यस्थालीसर्वस्कंदने

पुनराज्यस्योत्पत्तिः किंचिच्छेषेणोत्पत्तिः स्कन्नप्रायश्चित्तमेव बर्हिषादौस्कंदनेनप्रायश्चित्तं उक्तंचशतद्वयां भ
स्मन्यग्नौविद्यते अथपुरोडाशंवेदेन भस्मप्रमृज्यत्येनतदारभ्यपाच्यांप्रतिष्ठापयतीत्यंतंपुरोडाशपुरइच्छेत्पतेनत्स्फुटे
द्वातदापुरोडाशंतच्छकलानिवाप्यादाय किंपुत्मनसिकिंपुत्नेद्वाःशांताःशांतेरिहागहि अथोरोयज्ञियोभूत्वासी
दसद नस्वमासीदसदनंस्वमितिमंत्रेणबर्हिषिनिधाय माहिंसीर्देवप्रेरितआज्येनतेजसाज्यस्वमानः किंचनरीरिवि
षः योगक्षेमस्यशांत्याअस्मिन्नासीदबर्हिषीत्यभिमंत्र्यकालेसर्वप्रायश्चित्तंकुर्यात् इदंचआश्वलायनोक्तमापस्तंबा
नामपिसमानं स्वसूत्रेअनुक्तत्वात् अथायपर्णाचान्वर्मासेपुरुषकपालंहोमात्पूर्वेस्कंदेत्यपावन्नेनवा प्रजाप
तेर्वर्तेविमन्तुवर्त्तेस्यात्तुवीरेस्तुराथामगोभिरन्वश्वैरस्तुसर्वैरुपुष्टैः अनुप्रजयान्विंद्रियेणदेवानोयज्ञमृत्नुथान
यंत्विइतिपथास्थानंस्थापयति तंयजमानोनुमंत्रयते प्रतिक्षत्रेप्रतितिष्ठामिराष्ट्रेप्रत्यश्वेषुप्रतितिष्ठामिगोषु
प्रतिप्रजायांप्रतितिष्ठामिभव्ये विश्वमन्याभिवावृधेतदन्यस्यामधिश्रितंदिवेचविश्वकर्मणेपृथिव्यैचाकरन्नमः

इतिमंत्रेणावस्कां द्यौः पृथिवीमस्कानृषभो युवागाः स्कन्नेमाविश्वा भुवना स्कन्नो यज्ञः प्रजनयतु स्वाहा द्यावापृथि
वीभ्यामिदं अस्काभ्यामिदं हेत्याहुतिं जुहुयात् होमादूर्ध्वं यदि हुतः पर्यावर्तेत स्रुचीयेण समं कुर्यात् पुरोडा
शादि अमेध्यदेशे उद्गच्छेत् स्कन्ने द्वा तद्धविरप्सु प्रक्षिप्य पुनरग्निहोत्रहवण्यादिना दिहविरुत्पत्तिं कृत्वा सर्वप्रायश्चि
त्तं हुत्वा यागं कुर्यात् अमेध्यदेशलक्षणं देवलेनोक्तं यत्र प्रसूयते नारी म्रियते दह्यते पि वा चंडालाध्युषितं यत्र यत्र
विष्ठादिसंगतिः एवंकीटमीषसंयुक्ता अमेध्याभूः प्रकीर्तितेति एवंभूतं हविर्दुष्टमित्युच्यते तदप्सु प्रक्षिप्य यथो
क्तं प्रायश्चित्तं कर्तव्यं केशादिपतितेषु तद्देशमुद्धृत्य गार्हपत्यभस्म यत्र प्रक्षिप्य तेन यागं कुर्यात् आमिक्षाया
मेकदोहनाशे तं पुनरुत्पाद्य यागः उभयदोहनाशे आज्येन होमः वाजिने प्याज्यमेव प्रतिनिधिः तत्र सर्वत्र सर्वप्राय·
न सान्नाय्यप्रायश्चित्तं प्रधानयागात्पूर्वं हविः कीटकेशादिना दुष्टमपहृतं वा तदपहृतं हविरप्सु प्रक्षिप्य सर्वप्राय
श्चित्तं कृत्वा पुनस्तस्मिन्नेव प्रयोगे तद्देवतं हविर्निर्वापप्रभृति संपाद्यान्यैरदुष्टैः सह यजेत प्रधाने निष्पन्ने न पुन

रुत्पत्तिः स्विष्टकृदादिशेषमाज्येनैव कुर्यात् जुह्वां गृहीतमवदानं व्यापन्नं नष्टं वा पुनरायतनादवदाय यागः कर्तव्यः
सर्वप्रायश्चित्तं अवतंडुलादिषु अपि दृष्टकरणात्प्रक्षालनेन शुद्धिः पाकादूर्ध्वं त्यागः अत्यंतोपहतौ अल्पोपहतौ
प्रोक्षणादिना शुद्धिः एवमाज्यसहितानां सर्वेषां नाशे पवित्रकरणाद्याज्यसंस्कारं स्रुक्स्रुवग्रहणं याजमानमनुमंत्रणं
कृत्वा चतुर्वत्तेन सर्वभागं समाप्य पुनस्तेष्वेवाग्निषु अन्यामिष्टिं यथापूर्वं कुर्यात् असर्वनाशे यन्नष्टं तद्देवत्याद्ययागः
व्यापन्नं जले प्रक्षिप्य उत्करे वा यदा पुरोडाशाद्यपक्वं भवेत्तदा तामिष्टिं समाप्य दक्षिणाग्नौ चतुःशरावमोदनं पक्त्वा
चतुरो ब्राह्मणान्भोजयेत् नैषैको भागो वा नियतः अयमपक्वदोषः सान्नाय्ये आज्ये च नास्ति तत्र सर्वप्रायश्चि
त्तं आश्वलायनानामपि हविरपक्वे समानं हविष्यः एकदेशे दग्धे तच्छेषेणेष्ट्वा सर्वप्रायश्चित्तं कृत्वा होमवद्देवतां पुन
र्यजेत तस्मिन्प्रयोगे दक्षिणां द्वेष्याय दक्षिणां दद्यात् नर्त्विग्भ्यः सर्वेशे दग्धे तं प्रयोगं समाप्य पुनरन्वाधानादि
यागः आवाहनात्कालात्पूर्वं हविर्दोषे तत्सेव हविषः पुनरुत्पत्तिं कृत्वा यागसमाप्तिः आवाहनादूर्ध्वं हविर्दोषे आ

ङ्गेनेष्टिं समाप्य पुनर्यजेत् प्रधानद्रव्यव्यतिरिक्तानां नाशे आकर्मसमाप्तेरुत्पत्तिं कृत्वा तेन तेनांगेन यजेत् प्रधानद्र
व्याणां स्विष्टकृतात्पूर्वमेवोत्पत्तिः नोत्तरत्रेति हविषां काकादिस्पर्शे पक्षपाते वा इदं विष्णुरिति हुत्वा तद्धविर
प्सु प्रक्षिप्य पुनर्हविरुत्पत्तिं कृत्वा यजेत् चरुहोमे केनाप्युपघाते पुनस्त्वेतनेन समिदाधानं सर्वप्रायश्चित्तं आ
पस्तंबमेव बोधायनमते तु यस्मादिश्मत्येकः तद्दि शाखिपतितानामंत्रेणापि हुत्वाहुति रथिकाद्ध्या बर्हिषि
अनधोनिदधाति इसेत दारभ्योत्तरेणाहवनीयमासादनपर्यंतं देवा यदधः पतंति चेत्स्रुतः संस्थाप्य काले सर्वप्राय
श्चित्तं कुर्यात् अन्वाधानोत्तरं शोकादिनाशुकरणे आज्यभागोत्तरं देशकालो संकीर्त्य अन्वाधानोत्तरमस्मुपा
त्तनिनित प्रत्स्यवायपरिहारार्थं जातभृते ष्टिस्थाने पूर्णाहुतिं होष्यामीति संकल्प्य जुहां चतुर्गृहीतं गृहीत्वा अ
ग्नये व्रतभृते स्वाहेति हुत्वा सर्वप्रायश्चित्तं पत्न्या अपीदमेव इदमाश्वलायनानामपि यजमानस्य पत्न्या अ
ग्नेहं नित्य अनृतवदने सीमातिक्रमणे निषिद्धश्रवणे स्त्रीसंगे बुद्धिपूर्वकरेतस्कंदने व्रातपते ष्टिस्थाने पूर्णाहु

तिं होष्यामि अग्नये व्रतपतये स्वाहेति हुत्वा सर्वप्रायश्चित्तं अबुद्धिपूर्वे स्कंदने सर्वप्रायश्चित्तं कुष्मांडैर्जुहु
यात् यो द्वृत इव मन्येत यथा स्तेनो यथा भ्रूणहैवमेष भवति यो योनौ रेतः सिंचते यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मा
न्मुच्यते इति क्रमणमपि कुर्यात् होमाभावे जपो वा हूयमानाहुतिः यदि बहिः परिधिस्कंदेत् अध्व
र्युराग्नीध्रमाह एतां जुहुधीति ततः आग्नीध्रः अंजलिनातामादाय स्वाहाकारेण जुहोति तस्मै पूर्णपात्रं यज
मानो दद्यात् आश्वलायनानां दैवीजनेति मंत्रेणाग्नीध्रोभिमृश्येति विशेषः । परिधिनिधानोत्तरं प्रयाजेभ्यः प्रा
क् यदि बहिः परिधिदेशादंगारः पतेत् तदा अध्वर्युः स्रुवस्य बुध्नेन पीडयेत् मा तमो मा यज्ञस्तमन्मा यजमा
नस्तमत् नमस्ते अस्त्वायते नमो रुद्र परायते नमो यत्र निषीदसि यदि पूर्ववत्तः अध्वर्युमा हिंसीर्यजमा
नं मा हिंसीः इति तमंगारं अहं यज्ञं दधे निर्ऋते रुपस्थात्तं देवेभ्यः परिधिं ददामि विद्वान् सुप्रजास्त्वं हि
शतहिमा मदंत इह नो वा मयि शर्म यच्छेतीति आहवनीये प्रक्षिप्य सहस्रशृंगो वृषभो जातवेदास्तोमपृ

शेष्टनवांन्त्वघ्नतीकः मानोहासीन्मेतियोनेत्वाजहामगोपोषन्नोवीरपोषंचयच्छस्वाहा इतिहोमः सर्वप्रायश्चित्तं
दक्षिणेब्रह्माणंमाहिंसीर्यजमानंमा॰ पश्चाद्धोतारंमा॰ पत्नीमा॰ उत्तरतोऽग्नीध्रंमा॰ यजमानंमा॰ पशून्मा॰ इति आ
श्वलायनानां ब्रह्मान्तरंगारं स्रुवेणनिदध्यात् मातमोमायज्ञस्तमन्मायजमा॰निषीदसि अध्वर्युंमाहिंसीर्यज
मानंमाहिंसीः इतिपुरतः ब्रह्माणंमाहिं॰यजमानंमा॰ इतिदक्षिणतः होतारंमा॰पत्नीमा॰यजमानंमा॰ इति
पश्चात् आग्नीध्रंमा॰यजमानंमा॰ इत्युत्तरतः इतिपर्यादिशमभिमंत्र्य अथैनमनुहरेत् अहंयज्ञंदधेनिर्ऋ
तेरुपस्थात्तंदेवेभ्यःपरिधिंदधामिविद्वान् सुप्रजास्त्वंशतंहिमामदेमइहनोदेवामपिशर्मयच्छन्तेति अथप्र
हृतमंगारंब्रह्माभिजुहोति सहस्रशृंगोवृषभो जातवेदास्तो॰पंचयच्छस्वाहेति सर्वप्रायश्चित्तं अथदर्श
पूर्णमासंवानीयात्तदापथिकृतीवैश्वानरीचकृत्वातिपत्त्रयागंकुर्यात् उभेवासमानतंत्रे पथिकृतेनातिप
त्नयागंकुर्यात् इतिकेचित् अन्यस्याग्निषुदर्शपूर्णमासादिकरणेस्वाग्निष्वन्योवायागकरणेऽग्नयेव्रतवि

ष्टिंस्वाग्निषुकृत्वापुनर्दर्शादिकरणं अन्योग्निंनयेत् श्रौताग्निंचांतरालेलौकिकाग्नौन्वा अथवास्वाग्निभिःसहाग्नी
न्यवेयालौकिकाग्नौन्वाव्यवेयात्तदासर्वनिमित्तेषुपथिकृतीकार्या आश्वलायनानांकेवलपथिकृतौ नवैश्वा
नरी अमन्त्रमानं सर्वप्रायश्चित्तेष्वीशंस्थनेनस्येतस्येदेवतायेद्वादशगृहीतेनाष्टगृहीतेनचतुर्गृहीतेनस्रु
वपूर्णेनवापूर्णाहुतिंजुहुयात् तत्रपुरोनुवाक्यमन्त्रयाज्ययाहुतिं अपिवाचतुर्थ्यंतनाम्नोक्त्वास्वाहेति
जुहोति दर्शपूर्णमासादेराग्नीध्रलोपेसर्वप्रायश्चित्तं एवमन्येष्वपि आग्रयणमकृत्वान्नभक्षणेवैश्वान
रेष्टिंकुर्यात् इष्ट्यसंभवेपूर्णाहुतिर्वा ततःशरदिपर्वणिदेवनक्षत्रेरेवमांवाआग्रयणंकुर्यात् प्रथमाग्रय
णेशरत्कालेऽस्तादिप्रतिबंधेवसंतादर्वाक्गौणकालेऽपिमुख्यकालएवकुर्यात् पुराणधान्यालाभेदुर्भिक्षा
दौअस्तादावपिकार्यं प्रोषितेयजमानेआग्रयणानुकल्पंकृत्वानवान्नंभुंजीतेति प्रथमपौर्णमासीपत्नीरज
स्वलादिनाअस्तादिप्रतिबंधेनवाअन्वारंभणीयांआगामिपौर्णमास्यांविप्रकृष्टेष्टिपूर्वकमारंभणीया एवंदर्शे

रुद्र०
१८

पि प्रथमाग्रयणस्य शरदन्तये प्रथमचातुर्मास्यानां उदगात्ययेच विभ्रष्टेष्टिः कर्त्तव्या तत्र विभ्रष्टे प्रयोगः देशका
लकथनांते पौर्णमासेष्टिकाले पत्नी अनालंभुकत्वे नास्तादिदर्शनिबंधेनवा अनारंभजनितप्रत्यवायपरिहारद्वा
राश्रीपरमेश्वर॰ प्रीत्यर्थं इष्ट्यायक्ष्ये अमावास्यातंत्रं आग्नेयमष्टाकपालंनिर्वपेत् ऐंद्रमेकादशकपालं सौम्यंच
रुं अधिश्रयणकाले आग्नेयस्य सौम्यस्य लेपं गृहीत्वा ऐंद्रे क्षिपति पंचदशसामिधेन्यः वार्त्रघ्नावाज्यभागौ
अन्वाहार्यो दक्षिणा याज्यानुवाक्यायां विशेषः सप्रत्नवन्नवीयसाग्ने द्युम्नेन संयता बृहत्ततंथ भानुनाउ
पेत्र यजामहे अग्निनिकाव्या वेधसः शश्वतस्कृहस्ते दधानो नर्यापुरूणि अग्निर्भुवद्रयिपतिरयीणां सत्राचक्रा
णो अमृतानि विश्वावौ३षट् इत्याग्नेयस्य इंद्रंवोविश्वतस्परि॰ वलौं३ये॰ हइंद्र मिंद्रं नरोनेमधिताहवंतेय॰ भ
जातंत्वावौ॰ इतींद्रस्य त्वन्नःसोमविश्वतो॰ सखौं३ये॰ हे सोमं याते धामानि दिवि॰ भ्यावौ॰ इतिसोमस्य इंद्रस्य
संभवे पूर्णाहुतिर्वा अध्वर्य्यभावे इज्याभावे वा इष्टिदिने प्रातरग्निहोत्रहोमानंतरं देशकालौ संकीर्त्य पौर्णमासे

राम०
१८

ष्टिस्थाने पौर्णमासेष्टिदेवतयोः पूर्णाहुतयोर्होष्यामि आहवनीयंविहृत्य लौकिकाग्नेनाश्वलायनसूत्रोदाज्यमुत्पू
पर्श्वीक्तप्रकारेण पूर्णाहुतिंकुर्यात् इतिदर्शपूर्णमासप्रायश्चित्तानि अथाधानप्रायश्चित्तानि ॥ ॥ आधा
ने ब्रह्मौदनपाकात्पूर्वं ब्रह्मौदनाग्निनाशे स्वगृह्याग्नेर्मोपासनाग्न्यनुगमनप्रायश्चित्तं कृत्वा ब्रह्मौदनादिकार्यं सर्वाधा
निनः अर्धाधानिनस्तु पुनरेकदेशमाहृत्य सर्वप्रायश्चित्तंहुत्वा ब्रह्मौदनंकार्यं पाकादूर्ध्वं अरणीनिष्टपनात्पूर्वं अ
नुगमेत्पूर्ववदग्निमुत्पाद्य पुनर्ब्रह्मौदनादि समानवत्सरानंतं कुर्यात् ततस्त्यकरणाशक्तौ तं प्रयोगमुत्सृज्य कालां
तरे पुनः संभारहरणादिकार्यं मथनानंतरंजातस्याग्नेः निर्वर्त्तमानजपात्पूर्वं अनुगमे स्फुलिंगन्यायेन ततस्तदा
त्पुनर्मंथनंकार्यं ततस्प्रायश्चित्तं जाते निवर्त्तमानजपे संभारेषु निधानात्प्राक् अनुगमे तं प्रयोगं परित्यज्य का
लांतरे आदधीत तत्र प्रायश्चित्तानुपदेशात् केचित्तु अनाज्ञातत्रयं जपित्वा पुनर्मंथनंकार्यं प्रवृत्तप्रयोगस्य
त्यागेभावादित्याहुः अथवा दक्षिणाग्नेरुद्धरणानंतरं मंथनांतरं वाहरणानंतरं वा संभारेषु निधानात्प्राक् अनुग

रु.इ.
१९

मने च नाज्ञातत्रयं जपित्वा पुनः स्वयोनिं स्ततत्कुमायसंभोरेष्वनिदध्यात् दक्षिणाग्निरस्थापनात्पूर्वं तदुद्धृतस्याग्नेरा ह
वनीयस्यानुगमने अनाज्ञातत्रयं जपित्वा पुनरुद्धरणादिकं कार्यं आधानोत्तरं एवमाहवनीयाधाने संकल्पानंत
रं आग्नेयस्य दक्षिणाकालात्पूर्वं पत्नी रजस्वला चेत्तं प्रयोगमुत्सृज्य कालांतरे आदधीत दक्षिणादानात्पूर्वं चेत्ता
मपरुध्य समापनीयं ततः पूर्वं प्रयोगोत्सर्गमिति शतद्वयीकारः एवमाधाने यदैष्टिकं प्रायश्चित्तं तत्सर्वं पूर्णा
हुत्याः कर्तव्यं अन्वारब्धदर्शपूर्णमासत्वात् चातुर्मास्यादिष्वविकृतिष्वनुगमनप्रायश्चित्तं दार्शमिष्ट्यर्थं अन्वा
धानात्पूर्वं गार्हपत्यस्याहवनीयस्य चानुगमने तत्र दक्षिणाग्नौ मंथनं अवक्षाणाभावे निर्मारणी गार्हपत्य
भस्मना संसृज्य मंथयेत् एवमाहवनीयं लौकिकारणीतो मथित्वायतने निधाय मित्रादयो होतव्याः नोत्र
तपस्वतेष्टिः आधाने ष्टेः प्राकृद्व्यंतरस्याप्यनुपपत्तेः एवं दक्षिणाग्नेः स्वयोनितउमाय सर्वप्रायश्चित्तं से

राम.

ष्टिकस्याधानस्य आहवनीयसंपादकत्वेति पक्षे इष्टिमध्ये अग्नीनामनुगमने प्रयोगोत्प्रायश्चित्तमिति केचि

१९

त् तं कल्पकाराननुमतं केचिदिष्ट्यंतमाधानमपीति यदाधानस्यासमाप्तेः पुनरुत्पादयेत्स्वेरधानमंत्रैरायतने
निधाय मित्रादिहोमः इत्याहुः आधानोत्तरं इष्ट्यर्थं अन्वाधाने कृते येरनुगमने अन्वाहितं प्रायश्चित्तं सर्वेषा
पाकर्मपरिसमाप्तेः अत्र अजस्रस्याहवनीयस्य प्रणयनमेव विशेषोपदेशात् केचित्तु अजस्रस्याहवनी
यस्य गार्हपत्यात्तानुप्रवेशो लौकिकारणितो मथित्वायतने निधाय अन्वाहितप्रायश्चित्तमाहुः अथ सेष्टौ
समाप्नायां पुनरेष्ट्यन्वाधानात्पूर्वं अनुगमने नान्वाहितप्रायश्चित्तं अन्वाधानसंस्कारस्यानुष्ठेयत्वात् अ
न्यथा पुनरन्वाधानोपदेशोनर्थकः स्यात् किंतु योनिमतउत्पाद्य मित्रादिहोमः सर्वप्रायश्चित्तं पूर्णाहुतेः प्रा
कृयस्य कस्यचिदंगे लोपे पूर्णाहुतिं हुत्वा भुव इति दक्षिणाग्नौ जुहुयात् अत्र सर्वत्र जुह्वा आहवनीये होमः
आष्टन्नितायां स्रुवेणान्न्यंत्रेणाजपो वेति केचित् अनुगते होमे इत्यपरे अथाग्न्यनुगत्या सूर्योदयात्त्रा
क् गार्हपत्याधानासंभवे तं प्रयोगं परित्यज्य कालांतरे आदधीत केचित्कालस्यागत्वात्तल्लोपे च अनाज्ञातत्र

रु३० ३०

यं सर्वप्रायश्चित्तं गार्हपत्याधानं कर्त्तव्यं तत्र प्रायश्चित्तं शिवाजपांते गार्हपत्ये कर्त्तव्यं पूर्णमासवत् अथारण्योर्ना
शप्रायश्चित्तं तत्र बोधायनेन समारूढाग्नेरसमारूढाग्नेर्वारण्यो रूपहतनिमित्तादि उपहतयोः प्रायश्चित्त
मुच्यते अमेध्यचांडालरासभशूद्रवायसपतितरजस्वलाभिश्च इत्यष्टाभिः स्पर्शैरण्योर्विनाशः अयोग्यता
सादित्यर्थः तत्रामेध्यमशब्देन मूत्रपुरीषलोहितादयो गृह्यंते एतेषामुपहते दारुमयानां पात्राणामपि त्या
गः अत्र देवलोप्याह मानुषास्थिशवं विष्टा रेतो विण्मूत्रमेव च स्वेदाश्रुपूयिकाश्लेष्मा मेदश्चामेध्यमु
च्यते चंडालादिशब्देन सर्वे प्रतिलोमाः रजस्वलाशब्देन सूतिकापि एतैर्निमित्तैरुपहतयोः समारूढे
ग्नावरण्योर्विनाशः अन्ये अरणी आहृत्य पुनराधानं कर्त्तव्यं एवमेव यदा यदा अरणी जीर्णे स्यातां तदा
तदा कुर्यात् सर्वत्रान्वाहार्यमेव दक्षिणायाः समुच्चयः इति प्रायश्चित्तप्रदीपः ॥ ॥ अथ बोधायनः
यद्यरणी जीर्णे स्यातां जंतुभिर्मथ्येनेन वा समाने अन्ये नवे अरणी आहृत्य अमावास्यामुपोष्य श्वोभूते द

राम० ३०

र्शेनेष्ट्वा तस्मिन् जीर्णे शकली कृत्य गार्हपत्ये प्रक्षिप्य प्रज्वाल्य दक्षिणेनोत्तरारणीमादाय सव्येनाधरारणीमुपर्य
ग्नौ धारयं जपति उद्बुध्यस्वाग्ने प्रतिविशस्व योनिमन्यां देवयज्यां वोढवे जातवेदः अरण्यारणीमनु संक्रमस्व जी
र्णां तनुमजीर्णया निर्णुदस्व तया ज्यं अयं ते योनिरृत्वियः इत्यरण्योरग्निं समारोप्य मथनस्याहृत्वा गार्हपत्यं मथि
त्वा विहारं कल्पयित्वा गार्हपत्ये आज्यं विलाप्य उत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये संततं जुहोति मनो ज्योतिर्जु
षतां धातु याऽस्या उषसो घृतेन स्वाहा अग्नये तंतुमते पुरोडाशमष्टाकपालं निर्वपति शरावं दक्षिणां ददा
ति सिद्धमिष्टिः संतिष्ठते अथ प्रयोगः यद्यरणी जीर्णे स्यातां जंतुभिर्मथ्येनेन वा कापीक्ष्मे स्यातां दग्धे नष्टे
पहृते वा भवतः तदा उक्तेषायामविस्तारज्ञानपूर्वं अरण्यो समेमे एतुपशुक्ते उक्तलक्षणलक्षिते काय क्ष्मेन पेत्र
न्ये अरणी संपाद्यामावास्यायां प्रातरग्निहोत्रं हुत्वा अश्वत्थाद्धव्यवाहाद्धि जातामग्नेस्तनूं यज्ञियां संभरामि
शांतयोनिं शमीगर्भमग्नये प्रजनयितवे आयुर्मयि धेह्यायुर्यजमाने इत्येताभ्यामरणी माहृत्य अमान्वा

रुद्र॰
३१

धानादि कृत्वोपोष्य श्वोभूते दर्शेनेष्ट्वा जीर्णे अरणी शकलीकृत्य गार्हपत्ये प्रक्षिप्य नवे अरणी दक्षिणेनोत्तरारणिं
सव्येनाधरारणीमादाय गार्हपत्याग्रे रूपरिधारयन् जपति उद्बुध्यस्वाग्ने प्रतिमिति सौत्रमंत्रमुक्त्वा अयं ते योनि
रिति मंत्रेण नवारण्योः समारोपणं इतः प्रथममित्यादिनामंथनादि कृत्वा गार्हपत्यायतने गोमयेनोपलिप्ता
यतने ऽग्निं निधायाग्निद्वयं प्रणीय मनस्वतीं हुत्वा तंतुमतीष्टिं कुर्यात् अग्निहोत्रप्रसंगेन प्रायश्चित्तनिरूपणं
॥ ॥ अकारि नोरो रुद्रेण नृसिंहसेन तुष्यतु ॥ ॥ इति प्रतिष्ठानपुरवासी नोरो नारायणात्मज रुद्रदे
व कृते प्रतापनारसिंहे आपस्तंबाश्वलायनयोरग्निहोत्रहोमप्रवासविधिर्दर्शपूर्णमासेष्टिचातुर्मास्याधान
प्रायश्चित्तानि समाप्तानि ॥ ॥ प्रयाणे यजमानपत्न्यौ अरणीन्वारभेयातां ॥ ॥ अन्यथा लौकिकत्वं
यावंतो यजमानस्य ग्राममर्यादानप्नुतावंतोरतिक्रामितावदरणी अन्वारभेयातां ॥ ॥ इति रुद्रदेवीप्राय
श्चित्तसमाप्तिः अथ सर्वाध्वरप्रायश्चित्तं ॥ ॥ दर्शपूर्णमासयोश्चत्वार ऋत्विजः अभावे त्रयं कुर्युः होत्र

रा॰म॰
३१

रुद्र॰
३२

को वा तत्र अनाज्ञातजपः सर्वप्रायश्चित्तं कुर्यात् ॥ ॥ एकस्याप्यभावे यजमान एव सर्वं कुर्यात् प्रयाजा
न्पूर्वं अंतर्वेद्यासीनः सर्वाज्जुहोति जुष्टो वाचो भूयासं स्वाहा सरस्वत्यै स्वाहा सरस्वत्या इदं ॥ ॥

रा॰म॰
३२

॥रुद्रदेवप्रायश्चितं॥